Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

P-13233
30-11-03

# संस्कृत-श्लोक-संग्रहः

## [द्वितिय भाग]

संग्राहक—
पूज्य जैनाचार्य श्री १००८
श्री धर्मदासजी म. सा. की
सम्प्रदाय के शान्तस्वभावी
प्र. मु. श्री ताराचन्द्रजी
म. सा. के आज्ञानुवर्ती
कविरत्न पं. मु. श्री
सूर्य मुनिजी
म. साहब

પંન્યાસજી ભાનુવિજયજી ગણિવર્ય
પુસ્તક સંગ્રહ. નંબર

प्रथमावृत्ति
१०००

वी. सं. २४६६
वि. सं. १९९६

प्रकाशक—
श्री धर्मदास जैन
मित्र मंडल,
रतलाम
(मालवा)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री वीतरागाय नमः ॥

# संस्कृत-श्लोकसंग्रहः

## ( द्वितीयो भागः )

### वैराग्यम् ।

१

प्रचण्डवासनावातैरुद्धूता नौर्मनोमयी ।
वैराग्यकर्णधारेण, विना रोद्धुं न शक्यते ॥

२

नात्यक्त्वा सुखमाप्नोति, नात्यक्त्वा विन्दते परम् ।
नात्यक्त्वा चाभयः शेते, त्यक्त्वा सर्वः सुखी भवेत् ॥

३

यावतः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान् ॥
तावन्तोऽस्य निखन्यन्ते, हृदये शोकशङ्कवः ॥

४

निःस्नेहो याति निर्वाणं, स्नेहोऽनर्थस्य कारणम् ।
निःस्नेहेन प्रदीपेन, यदेतत्प्रकटीकृतम् ॥

५

येषु येषु दृढं बद्धा, भावना दृढवस्तुषु ।
तानि तानि विनष्टानि, दृष्टानि किमिहोत्तमम् ॥

६

गतेनापि न सम्बन्धो, न सुखेन भविष्यता ।
वर्तमानं क्षणातीतं, सङ्गतिः कस्य केन वा ॥

७

मातृपितृसहस्राणि, पुत्रदारशतानि च ।
तवानन्तानि यातानि, कस्य ते कस्य वा भवान् ॥

८

सर्वे क्षयान्ता निचयाः, पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता, मरणान्तं हि जीवितम् ॥

९

जन्मैव व्यर्थतां नीतं, भवभोगप्रलोभिना ।
काचमूल्येन विक्रीतो, हन्त चिन्तामणिर्यथा ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१०

यस्यां रात्रौ व्यतीतायां, न किञ्चिच्छुभमाचरेत् ।
तदेव बन्ध्यं दिवसं, प्रतिविद्याद्विचक्षणः ॥

११

जीवितं मरणान्तं हि, जरान्ते रूपयौवने ।
सम्पदो विपदान्ता वा, अत्र को रतिमाप्नुयात् ॥

१२

न बन्धुरस्ति ते कश्चिन्न, त्वं बन्धुश्च कस्यचित् ।
पथि सङ्गतमेवैतद्दारबन्धुसुहृज्जनैः ॥

१३

अनित्ये सति मानुष्ये, विद्युत्स्फुरणचञ्चले ।
ये रमन्ति नमस्तेभ्यः, साहसं किमतः परम् ॥

१४

तदनित्यमिति ज्ञात्वा, सर्वभावेष्वनित्यताम् ।
सर्वारम्भान् परित्यज्य, भव चात्मनि योगवित् ॥

१५

सञ्चितं सञ्चितं द्रव्यं, नष्टं तव पुनः पुनः ।
कदाचिन्मोचयसे मूढ, धनेहां धनकामुक ! ॥

१६

स्वदेहाशुचिगन्धेन, न विरज्येत यः पुमान् ।
वैराग्यकारणं तस्य, किमन्यदुपदिश्यते ॥



१७

गृहारम्भो हि दुःखाय, न सुखाय कदाचन ।
सर्पः परकृतं वेश्म, प्रविश्य सुखमेधते ॥

१८

अनित्ये प्रियसंवासे, संसारे चक्रवद्गतौ ।
पथि संगतमेवैतद्भ्राता माता पिता सखा ॥

१९

यतो यतो निवर्तते, ततस्ततो विमुच्यते ।
निवर्तनाद्धि सर्वतो, न वेत्ति दुःखमण्वपि ॥

२०

न मातृपुत्रबान्धवा, न संस्तुतः प्रियो जनः ।
अनुव्रजन्ति सङ्कटे, व्रजन्तमेकपातिनम् ॥

२१

यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
तदनु च जाया जर्जरदेहे, वार्ता कोऽपि न पृच्छति गेहे ॥

२२

हरिष्यमाणो बहुधा परस्वं,
करिष्यमाणः सुतसम्पदादि ।
धरिष्यमाणोऽरिशिरःसुपादं,
न स्वं मरिष्यन्तमवैति कोऽपि ॥

२३

कुटुम्बचिन्ताकुलितस्य पुंसः,
कुलञ्च शीलञ्च गुणाश्च सर्वे ।
अपक्वकुम्भे निहिता इवापः,
प्रयान्ति देहेन समं विनाशम् ॥

२४

सुरूपं शरीरं नवीनं कलत्रं,
धनं मेरुतुल्यं वचश्चारुचित्रम् ।
जिनाङ्घ्रिद्वये ते मनश्चेदलग्नं,
ततः किं ततः किं ततः किं ततः किम् ॥

२५

मित्रं कलत्रमितरः परिवारलोको,
भोगैकसाधनमिमाः किल सम्पदो नः ।
एकः क्षणः स तु भविष्यति यत्र भूयो,
नायं न यूयमितरे न वयं न चैते ॥

२६

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती,
रोगाश्च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाम्भो,
लोकस्तथाप्यहितमाचरतीति चित्रम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२७

देहो विनश्यति सदा परिणामशील–
श्चित्तञ्च खिद्यति सदा विषयानुरागि ।
बुद्धिः सदा हि रमते विषयेषु नान्त–
स्तस्मात् त्वमद्य शरणं मम दीनबन्धो ! ॥

२८

आयुर्विनश्यति यथाऽऽमघटस्थतोयं,
विद्युत्प्रभेव चपला वत यौवनश्रीः ।
वृद्धा प्रधावति यथा मृगराजपत्नी,
तस्मात् त्वमद्य शरणं मम दीनबन्धो ॥

२९

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं ।
व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ॥
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते ।
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥

३०

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं ।
मौने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ॥
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं ।
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाऽभयम् ॥

३१

व्याख्यानान्ते श्मशानान्ते, भोजनान्ते च या मतिः ।
सा मतिः सर्वदा चेत्स्यात् को न मुच्येत बन्धनात् ॥

३२

यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक, एकत्वमनुपश्यतः ॥

३३

प्रदीप्ते रागाग्नौ सुदृढतरमाश्लिष्यति वधूं ।
प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः ॥

३४

यथा व्यालगलस्थोपि, भेको दंशानपेक्षते ।
तथा कालाहिना ग्रस्तो, लोको भोगानशाश्वतान् ॥

३५

दन्तीन्द्र–दन्त-दलनैकविधौ समर्थाः,
सन्त्यत्र रौद्रमृगराजवधे प्रवीणाः ।
आशीविषोरगवशीकरणेपि दक्षाः,
पंचाक्षनिर्जयपरास्तु न सन्ति मर्त्याः ॥

३६

मातृपितृसहस्राणि, पुत्रदारशतानि च ।
प्रतिजन्मनि वर्तन्ते, कस्य माता पिताऽपि वा ? ॥

३७

का तव कान्ता कस्ते पुत्रः, संसारोऽयमतीव विचित्रः ।
कस्य त्वं वा कुत आयातस्तत्त्वं चिन्तय तदिदं भ्रातः !

३८

यत्र जाता रतास्तत्र, ये पीतास्ते च मर्दिताः ।
अहो ! लोकस्य मूर्खत्वं, वैराग्यं किन्न जायते ॥

३९

अहन्यहनि भूतानि, गच्छन्ति यममन्दिरम् ।
शेषा जीवितुमिच्छन्ति, किमाश्चर्यमतः परम् ॥

४०

संसारावासभीरूणां, त्यक्तान्तर्बाह्यसङ्गिनाम् ।
विषयेभ्यो निवृत्तानां, श्लाघ्यं तेषां हि जीवितम् ॥

४१

न चेन्द्रस्य सुखं किञ्चिन्न चापि चक्रवर्तिनः ।
सुखमस्ति विरक्तस्य, मुनेरेकान्तजीविनः ॥

४२

बिभेषि यदि संसारान्मोक्षप्राप्तिं च काङ्क्षसि ।
तदेन्द्रियजयं कर्तुं, स्फोरय स्फारपौरुषम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

४३

कष्टोपार्जितमत्र वित्तमखिलं द्यूते मया योजितं ।
विद्या कष्टतरं गुरोरधिगता व्यापारिता कुस्तुतौ ॥
पारम्पर्यसमागतश्च विनयो वामेक्षणार्थं कृतः ।
सत्पात्रे किमहं करोमि विवशः कालेऽद्य नेदीयसि ?

## मोह ।

१

लोहदारुमयैः पाशैः, पुमान् बद्धो विमुच्यते ।
पुत्रदारमयैः पाशैर्बद्धो नैव विमुच्यते ॥

२

पाषाणखण्डेष्वपि रत्नबुद्धिः,
कान्तेति धीः शोणितमांसपिण्डे ।
पञ्चात्मके वर्ष्मणि चात्मभावो,
जयत्यसौ काचन मोहलीला ॥

३

अहो विकल्पितं विश्वमज्ञानान्मयि वर्तते ।
रौप्यं शुक्तौ फणी रज्जौ, वारि सूर्यकरे यथा ॥

४

अनेकशतसंख्याभि-स्तर्कव्याकरणादिभिः ।
पतिता शास्त्रजालेषु, प्रज्ञावन्तो विमोहिताः ॥

५

सर्वे मिलित्वा निष्पन्नं, समुदायः सुदुःखदः ।
तस्य मोहेन जीवोऽयम्, दुःखं नानाविधं श्रयेत् ॥

६

मुच्यते शृङ्खलाबद्धो, नाडीबद्धोऽपि मुच्यते ।
न मुच्यते कथमपि, प्रेम्णा बद्धो निरर्गलः ॥

७

भर्तुर्विरहतो नार्यः, प्रविशंत्यनलांतरे ।
स्वेच्छया च सहर्षेण, तत्र प्रेमप्रपञ्चकः ॥

८

अहो मोहस्य माहात्म्यं, विद्वांसो येऽपि मानवाः ।
मुह्यन्ति तेऽपि संसारे, कामार्थरतितत्पराः ॥

९

निर्मलं स्फटिकस्येव, सहजं रूपमात्मनः ।
अध्यस्तोपाधिसम्बन्धो, जडस्तत्र विमुह्यति ॥

१०

दाराः परिभवकाराः, बन्धुजनो बन्धनं विषं विषयाः ।
कोऽयं जनस्य मोहो, ये रिपवस्तेषु सुहृदाशा ! ॥

११

मार्जारभक्षिते दुःखं, यादृशं गृहकुक्कुटे ।
न तादृङ्ममताशून्ये, कलविङ्केऽथ मूषिके ॥

१२

भूषणोद्यानवाप्यादौ, मूर्छितास्त्रिदशा अपि ।
च्युत्वा तत्रैव जायन्ते, पृथ्वीकायादियोनिषु ॥

१३

कर्मणा मोहनीयेन, मोहितं सकलं जगत् ।
धन्या मोहं समुत्सार्य, तपस्यन्ति महाधियः ॥

१४

निर्ममत्वे सदा सौख्यं, संसारस्थितिछेदनम् ।
जायते परमोत्कृष्टमात्मनि संस्थिते सति ॥

१५

छित्वा स्नेहमयान् पाशान्, भित्वा मोहमहार्गलम् ।
सच्चारित्रसमायुक्ताः, शूरा मोक्षपथे स्थिताः ॥

१६

यदयं स्वामी यदिदं सद्म, सर्वं चैतन्मिथ्या सद्म ।
यदियं कान्ता यदयं कान्तः, सोऽयं मोहो हन्त दुरन्तः ॥

१७

जानामि क्षणभङ्गुरं जगदिदं जानामि तुच्छं सुखं ।
जानामीन्द्रियवर्गमेतदखिलं स्वार्थैकनिष्ठं सदा ॥
जानामि स्फुरिताचिरद्युतिचलं विस्फूर्जितं सम्पदाम् ।
नो जानामि तथापि कः पुनरसौ मोहस्य हेतुर्मम ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१८

भार्येयं मधुराकृतिर्मम प्रीत्यन्वितोऽयं सुतः।
स्वर्णस्यैव महानिधिर्मम ममासौ बन्धुरो बान्धवः॥
रम्यं हर्म्यमिदं ममेत्थमनया व्यामोहितो मायया।
मृत्युं पश्यति नैव दैवहतकः क्रुद्धं पुरश्चारिणम्॥

१६

मीना मृत्युं प्रयाता रसनवशमिता दन्तिनः स्पर्शरुद्धाः,
बद्धास्ते वारिबन्धे ज्वलनमुपगता पत्रिणश्चाक्षदोषात्।
भृङ्गा गन्धोद्धताशाः प्रलयमुपगता गीतलोलाः कुरङ्गाः,
कालव्यालेन दष्टास्तदपि तनुभृतामिन्द्रियार्थेषु रागः॥

२०

एकैककरणपरवशमपि, मृत्युं याति जन्तुजातमिदम्।
सकलाक्षविषयलोलः,कथमिह कुशली जनोऽन्यः स्यात्

## ४ गतिवर्णन।

१

नरस्य चिह्नं नरकागतस्य,विरोधिता बन्धुजनेषु नित्यम्।
सरोगतानीचगतेषु सेवा, ह्यतीव दोषा कटुका च वाणी॥

२

बह्वाशी नैव सन्तुष्टो, मायावी च क्षुधाधिकः।
स्वपन्मूढोऽलसश्चैव, तिर्यग्योन्यागतो नरः॥

३

नाति लोभो विनीतश्च, दयादानरुचिर्मृदुः।
प्रसन्नवदनश्चैव, मनुष्यादागतो नरः॥

४

स्वर्गच्युतानामिह जीवलोके,
चत्वारि चिह्नानि वसन्ति देहे।
दानप्रसङ्गो मधुरा च वाणी,
देवार्चनं पण्डिततर्पणञ्च॥

५

क्षुधालुता मानविहीनता च,
शाठ्यं भयं शोकमनोऽप्रशस्ति।
आहारनिद्रे प्रचुरे च चिह्नं,
तिर्यग्भवादागतमानवानां॥

६

निर्दम्भतामानदयालुता च,
ऋजुस्वभावो विनयो विवेकः।
चातुर्य–निर्लोभमनोविशुद्धि–
श्चिह्नं नराणां मनुजागतानाम्॥

७

वदान्यता धर्मगुरौ रुचिश्च,नम्रस्वभावो मधुरा च वाणी।
उदारबुद्धिर्जनके च भक्तिश्चिह्नं नराणाममरागतानाम्॥

८

मिथ्यादृष्टिः कुशीलश्च, महारंभपरिग्रही।
पापः क्रूरपरिणामो, नरकायुर्निबन्धकाः॥

९

उन्मार्गदेशको मार्ग–नाशको बहुमायिकः।
शठवृत्तिः सशल्यश्च, तिर्यगायुर्निबन्धकाः॥

१०

प्रकृत्याऽल्पकषायः स्याच्छीलसंयमवर्जितः।
दानशीलो मनुष्यायुर्गुणैर्बध्नाति मध्यमैः॥

११

अकामनिर्जराबाल–तपोऽणुव्रतसुव्रतैः।
जीवो बन्धाति देवायुः सम्यग्दृष्टिश्च यो भवेत्॥

### ( मनुष्य गति )

१२

अनुलोभो विनीतश्च, दयादानरुचिर्मृदुः।
सहर्षो मध्यदर्शी च, मनुष्यादागतो नरः॥

१३

निर्दम्भः सदयो दानी, दान्तो दक्ष ऋजुः सदा।
मर्त्ययोनिसमुद्भूतो, भावी तत्र पुनः पुमान्॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१४

सतुष्टता मध्यमवर्त्तिता च,
स्वल्पश्च कोपो निकषायता च।
भोगाभिलाषे समचित्तता च,
भवन्ति मानुष्यसमागतानाम् ॥

१५

मार्दवार्जवसम्पन्नो गतदोषकषायकः ।
न्यायवान् गुणगृह्यश्च मनुष्यगतिमागमेत् ॥

## ( तिर्यञ्च गति )

१६

मायालोभक्षुधाऽलस्य—बह्वाहारादिचेष्टितैः ।
तिर्यग्योनिसमुत्पत्तिं, ख्यापयत्यात्मनः पुमान् ॥

१७

उन्मार्गदेशनपराः कृतमार्गनाशाः ।
मायाविनो विहितजातिबलादिमानाः ॥
अन्तःसशल्यशठशीलपराश्च जीवा—
स्तिर्यग्गतेर्जननमायुरुपार्जयन्ति ॥

१८

क्षुत्तृड्हिमोष्णानिलशीतदाह—
दारिद्र्यशोकप्रियविप्रयोगैः ।
दौर्भाग्यमौर्ख्यानभिजात्यदास्य—
वैरूप्यरोगादिभिरस्वतंत्रः ॥

## ( नरक गामी )

१९

कूपानाञ्च तडागानां, प्रपानाञ्च परन्तप ।
रथ्यानाञ्चैव भेत्तारस्ते वै निरयगामिनः ॥

२०

क्षेत्रवृत्तिगृहच्छेदं, प्रीतिच्छेदञ्च ये नराः ।
आशाच्छेदं प्रकुर्वन्ति, ते वै निरयगामिनः ॥

२१

मद्यमांसरताश्चैव, गीतवाद्यरताश्च ये ।
द्यूतसङ्गरताश्चैव, ते वै निरयगामिनः ॥

२२

अनाथं कृपणं दीनं, रोगार्त्तं वृद्धमेव च ।
नानुकम्पन्ति ये मूढास्ते वै निरयगामिनः ॥

२३

कृतघ्नो निर्दयः पापी, परद्रोहविधायकः ।
रौद्रध्यानपरः क्रूरो नरो नरकमागमेत् ॥

## ( स्वर्गगामी )

२४

सत्येन तपसा क्षान्त्या, दानेनाध्ययनेन च ।
ये धर्ममनुवर्तन्ते, ते नराः स्वर्गगामिनः ॥

२५

आढ्याश्च रूपवन्तश्च, यौवनस्थाश्च भारत ।
ये वै जितेन्द्रिया धीरास्ते नराः स्वर्गगामिनः ॥

२६

येऽनभ्यासबलाद्वक्तुं, न जानन्ति वचोऽप्रियम् ।
प्रियवाक्यैकविज्ञानास्ते नराः स्वर्गगामिनः ॥

२७

आक्रोशन्तं स्तुवन्तञ्च, तुल्यं पश्यन्ति ये नराः ।
शान्तात्मानो जितात्मानस्ते नराः स्वर्गगामिनः ॥

२८

मनसश्चेन्द्रियाणाञ्च, नित्यं संयमने रताः ।
त्यक्तशोकभयक्रोधास्ते नराः स्वर्गगामिनः ॥

२९

कर्मणा मनसा वाचा, नोपतापयते परम् ।
सर्वथा शुद्धभावो यः, स याति त्रिदिवं नरः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३०

परस्वे निर्ममा नित्यं, परदारविवर्जकाः ।
धर्मलब्धार्थभोक्तारस्ते नराः स्वर्गगामिनः ॥

३१

पिशुनां ये न भाषन्ते, भिन्नभेदकरीं गिरम् ।
ऋतं मैत्रन्तु भाषन्ते, ते नराः स्वर्गगामिनः ॥

३२

ये वर्जयन्ति परुषं, परद्रोहञ्च मानवाः ।
सर्वभूतसमा दान्तास्ते नराः स्वर्गगामिनः ॥

३३

असत्प्रलापाद्विरता, विरुद्धपरिवर्जकाः ।
सौम्यप्रलापिनो ये च, ते नराः स्वर्गगामिनः ॥

३४

श्रुतवन्तो दयावन्तः, शुचयः सत्यसङ्गराः ।
स्वैरर्थैः परिसन्तुष्टास्ते नराः स्वर्गगामिनः ॥

३५

श्रद्धावन्तो दयावन्तश्चोक्षाश्चोक्षजनप्रियाः ।
धर्माधर्मविदो नित्यं, ते नराः स्वर्गगामिनः ॥

३६

सर्वहिंसानिवृत्ता ये, नराः सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च, ते नराः स्वर्गगामिनः ॥

३७

मातृवत्स्वसृवच्चैव, नित्यं दुहितृवच्च ये ।
परदारेषु वर्तन्ते, ते नराः स्वर्गगामिनः ॥

३८

भयार्ताञ्च सशोकाञ्च, दरिद्रान् व्याधिकर्षितान् ।
विमोचयन्ति ये जन्तून्, ते नराः स्वर्गगामिनः ॥

३९

सर्वजीवदयार्थं तु, ये न हिंसन्ति प्राणिनः ।
निश्चितं धर्मसंयुक्तास्ते नराः स्वर्गगामिनः ॥

४०

सद्धर्मः सुभगो नीरुक्, सुस्वप्नः सुनयः कविः ।
सूचयत्यात्मनः श्रीमान्, नरः स्वर्गे गमागमौ ॥

४१

मातापित्रोश्च शुश्रूषां, ये कुर्वन्ति सदाऽऽदृताः ।
वर्जयन्ति दिवा स्वापं, ते नराः स्वर्गगामिनः ॥

४२

दानं दरिद्रस्य प्रभोश्च शान्ति—
यूनां तपो ज्ञानवतां च मौनम् ।
इच्छानिवृत्तिश्च सुखान्वितानां,
दया च भूतेषु दिवं नयन्ति ॥

# ध्यान ।

१

उत्कृष्टकायबन्धस्य, साधोरन्तर्मुहूर्ततः ।
ध्यानमाहुरथैकाग्रचिन्तारोधो बुधोत्तमाः ॥

२

यदैव संयमी साक्षात्समत्वमवलम्बते ।
स्यात्तदैव परं ध्यानं तस्य कर्मौघघातकम् ॥

३

अनादिविभ्रमोद्भूतं रागादितिमिरं घनम् ।
स्फुटत्याशु जीवस्य ध्यानार्कः प्रविजृम्भितः ॥

४

ध्यानमेवापवर्गस्य मुख्यमेकं निबन्धनम् ।
तदेव दुरितव्रातगुरुकक्षहुताशनम् ॥

५

अस्तरागो मुनिर्यत्र वस्तुतत्त्वं विचिन्तयेत् ।
तत्प्रशस्तं मतं ध्यानं सूरिभिः क्षीणकल्मषैः ॥

६

अज्ञातवस्तुतत्त्वस्य रागाद्युपहतात्मनः ।
स्वातन्त्र्यवृत्तिर्या जन्तोस्तदसद्ध्यानमुच्यते ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१४

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं ।
नोलूकेन विलोक्यते यदि दिवा सूर्यस्य किं दूषणम् ॥
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं ।
यद्धात्रा निजभालपट्टलिखितं तन्मार्जितुं कः क्षमः ॥

१५

ब्रह्मा येन कुलालवन्नियमितो ब्रह्मांडभाण्डोदरे ।
विष्णुर्येन दशावतारगहने क्षिप्तः सदा संकटे ॥
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः ।
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥

१६

जातः सूर्यकुले पिता दशरथः क्षोणीभुजामग्रणीः ।
सीता सत्यपरायणा प्रणयिनी यस्यानुजो लक्ष्मणः ॥
दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयं ।
रामो येन विडम्बितोऽपि विधिना चान्ये जने का कथा॥

१७

सत्यानुसारिणी लक्ष्मीः, कीर्तिस्त्यागानुसारिणी ।
अभ्याससारिणी विद्या, बुद्धिः कर्मानुसारिणी ॥

१८

१२ पूर्वदत्तेषु या विद्या, पूर्वदत्तेषु यद्धनम् ।
पूर्वदत्तेषु या भार्या, अग्रे धावति धावति ॥

१९

पदे पदे च रत्नानि, योजने रसकूपिका ।
भाग्यहीना न पश्यन्ति, बहुरत्ना वसुन्धरा ॥

२०

वैद्या वदन्ति कफपित्तमरुद्विकारान्,
ज्योतिर्विदो ग्रहकृतं प्रवदन्ति दोषम् ।
भूताभिषङ्ग इति भूतविदो वदन्ति,
प्राचीनकर्म बलवन्मुनयो वदन्ति ॥

२१

आरूढाः प्रशमश्रेणीं, श्रुतकेवलिनोऽपि च ।
भ्राम्यन्तेऽनंतसंसारमहो ? दुष्टेन कर्मणा ॥

२२

सा सा सम्पद्यते बुद्धिः, सा मतिः सा च भावना ।
सहायास्तादृशा एव, यादृशी भवितव्यता ॥

२३

आपदा-मापतन्तीनां, हितोऽप्यायाति हेतुताम् ।
मातृजङ्घा हि वत्सस्य, स्तम्भीभवति बन्धने ॥

२४

व्रजत्यधः प्रयात्युच्चैर्नरः स्वैरेव चेष्टितैः ।
अधः कूपस्य खनक ऊर्ध्वं प्रासादकारक; ॥

२५

उपर्युपरि लोकस्य, सर्वो गन्तुं समीहते ।
यतते च यथाशक्ति, न च तद्वर्तते तथा ॥

२६

सन्ति पुत्राः सुबहवो, दरिद्राणामनिच्छताम् ।
नास्ति पुत्रः समृद्धानां, विचित्रं विधिचेष्टितम् ॥

२७.

प्रायेण श्रीमतां लोके, भोक्तुं शक्तिर्न विद्यते ।
काष्ठान्यपि हि जीर्यन्ते, दरिद्राणाञ्च सर्वशः ॥

२८

हसता क्रियते कर्म, रुदता परिभुज्यते ।
सुखञ्च जायते तेन, दुःखं तेनैव जायते ॥

२९

नालं सुखाय सुहृदो, नालं दुःखाय शत्रवः ।
न च प्रज्ञाऽलमर्थानां, न सुखानामलं धनम् ॥

३०

असुहृत्ससुहृच्चापि, सशत्रुमित्रवानपि ।
सुप्रज्ञः प्रज्ञया हीनो दैवेन लभते सुखम् ॥

३१

दृश्यते हि कुले जातो, दर्शनीयः प्रतापवान् । ९
दुःखं जीवन्सहामात्यो, भवितव्यं हि तत्तथा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२१

केचिज्ज्वालावलीढा हरिशरभगजव्यालविध्वस्तदेहाः,
केचित्क्रूरादिदैत्यैरदयमतिहताश्चक्रशूलासिदण्डैः ।
भूकम्पोत्पातवातप्रबलपविघनव्रातरुद्धास्तथाऽन्ये ।
कृत्वा स्थैर्यं समाधौ स्पदि शिवपदं निःप्रपञ्चं प्रपन्नाः॥

## चार ध्यान वर्णन ।

१

राज्योपभोगशयनासनवाहनेषु,
स्त्रीसङ्गमाल्यमणिरत्नविभूषणेषु ।
इच्छाभिलाषमतिमात्रमुपैति मोहात्,
ध्यानं तदार्त्तमिति तत्प्रवदन्ति धीराः ॥

२

सञ्छेदनैर्दहनभञ्जनमारणैश्च,
बन्धप्रहारदमनैर्विनिकृन्तनैश्च ।
ये यान्ति रागमुपयान्ति च नानुकम्पं,
ध्यानं तु रौद्रमिति तत्प्रवदन्ति धीराः ॥

३

सूत्रार्थसाधन-महाव्रतधारणेषु,
बन्धप्रमोक्षगमनागमहेतुचिन्ता ।
पञ्चेन्द्रियव्यपगमश्च दया च भूते,
ध्यानं तु धर्ममिति तत्प्रवदन्ति धीराः ॥

४

यस्येन्द्रियाणि विषयेषु पराङ्मुखानि,
सङ्कल्पनातिकुविकल्पविकारदोषैः ।
योगैः सदा त्रिभिरहो निभृतान्तरात्मा,
ध्यानोत्तमं प्रवरशुक्लमिदं वदन्ति ॥

५

निष्क्रियं [1]करणातीतं, ध्यानधारणवर्जितम् ।
अन्तर्मुखं च यच्चित्तं, तच्छुक्लमिति पठ्यते ॥

६

आर्त्ते तिर्यगथो तथा गतिरधो ध्याने तु रौद्रे सदा ।
धर्मे देवगतिः शुभं बहुफलं शुक्ले तु जन्मक्षयः ॥
तस्माद् व्याधिरुगन्तके हितकरे संसारनिर्वाहके ।
ध्याने शुक्लवरे रजःप्रमथने कुर्यात् प्रयत्नं बुधः ॥

७

पदस्थं मन्त्रवाक्यस्थं, पिण्डस्थं स्वात्मचिन्तनम् ।
रूपस्थं सर्वचिद्रूपं, रूपातीतं निरञ्जनम् ॥

८

धर्मध्याने भवेत् भावः क्षायोपशमिकादिकः ।
लेश्याः क्रमविशुद्धाः स्युः, पीतपद्मसिताः पुनः ॥

### धर्म ध्यान के ४ भेद—

९

आज्ञाऽपायविपाकानां संस्थानस्य च चिन्तनात् ।
इत्थं वा ध्येयभेदेन धर्म्यं ध्यानं चतुर्विधम् ॥

### ( १ आज्ञाविचय ध्यान )

१०

नयभंगप्रमाणाढ्यां, हेतूदाहरणान्विताम् ।
आज्ञां ध्यायेज्जिनेन्द्राणामप्रामाण्याकलंकिताम् ॥

### ( २ अपायविचय ध्यान )

११

रागद्वेषकषायादिपीडितानां जनुष्मताम् ।
ऐहिकामुष्मिकांस्तांस्तान्नानाऽपायान् विचिन्तयेत् ॥

### ( ३ विपाकविचय ध्यान )

१२

ध्यायेत्कर्मविपाकं च, तं तं योगानुभावजम् ।
प्रकृत्यादिचतुर्भेदं, शुभाशुभविभागतः ॥

1 इन्द्रियातीतम्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१३

प्रतिक्षणसमुद्भूतो, यत्र कर्मफलोदयः ।
चिन्त्यते चित्ररूपः स विपाकविचयो मतः ॥

## ( ४ संस्थानविचय ध्यान )

१४

उत्पादस्थितिभंगादिपर्यायैर्लक्षणैः पृथक् ।
भेदैर्नामादिभिर्लोकसंस्थानं चिंतयेद् भृशम् ॥

१५

अनाद्यनन्तस्य लोकस्य, स्थित्युत्पत्तिव्ययात्मनः ।
आकृतिं चिन्तयेद् यत्र, संस्थानविचयः स तु ॥

१६

निर्लेपस्य निरूपस्य, सिद्धस्य परमात्मनः ।
चिदानन्दमयस्य स्याद्. ध्यानं रूपविवर्जितम् ॥

१७

आर्त्तरौद्रपरित्यागाद्, धर्मशुक्लसमाश्रयात् ।
जीवः प्राप्नोति निर्वाणमनन्तसुखमच्युतम् ॥

## कर्म ।

१

दैवं फलति सर्वत्र, न विद्या न च पौरुषम् ।
समुद्रमथनाल्लेभे, हरिर्लक्ष्मीं हरो विषम् ॥

२

यथा धेनुसहस्रेषु, वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म, कर्तारमनुगच्छति ॥

३

विपत्तौ किं विषादेन, संपत्तौ हर्षणेन किम् ।
भवितव्यं भवत्येव, कर्मणामीदृशी गतिः ॥

४

पिता रत्नाकरो यस्य, लक्ष्मीर्यस्य सहोदरी ।
शङ्खो रोदिति भिक्षार्थी, फलं भाग्यानुसारतः ॥

५

कर्मणा बाध्यते बुद्धिर्न बुद्ध्या कर्म बाध्यते ।
सुबुद्धिरपि यो रामो, हैमं हरिणमन्वगात् ॥

६

अवश्यं भाविनो भावा, भवन्ति महतामपि ।
नग्नत्वं नीलकण्ठस्य, महाहिशयनं हरेः ॥

७

किं करोति नरः प्राज्ञः, प्रेर्यमाणः स्वकर्मणा ।
प्रागेव हि मनुष्याणां, बुद्धिः कर्मानुसारिणी ॥

८

असंभवं हेममृगस्य जन्म, तथापि रामो लुलुभे मृगाय ।
प्रायःसमापन्नविपत्तिकाले, धियोऽपि पुंसां मलिना भवन्ति

९

न भूतपूर्वो न च केन दृष्टो, हेम्नः कुरंगो न कदापि वार्ता ।
तथापि तृष्णा रघुनन्दनस्य, विनाशकाले विपरीतबुद्धिः ॥

१०

धनानि भूमौ पशवश्च गोष्ठे, भार्या गृहद्वारि जनः श्मशाने
देहश्चितायां परलोकमार्गे, कर्मानुगो गच्छति जीव एकः

११

वने जने शत्रुजलाग्निमध्ये,
महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा,
रक्षन्ति पुण्यानि पुराकृतानि ॥

१२

सुखस्य दुःखस्य न कोऽपि दाता,
परो ददातीति कुबुद्धिरेषा ।
अहं करोमीति वृथाभिमानः,
स्वकर्मसूत्रग्रथितो हि लोकः ॥

१३

स हि गगनविहारी कल्मषध्वंसकारी ।
दशशतकरधारी ज्योतिषां मध्यचारी ॥
विधुरपि विधियोगाद् ग्रस्यते राहुणासौ ।
लिखितमिह ललाटे प्रोज्झितुं कः समर्थः ॥



For Private And Personal Use Only

७

आर्त्तरौद्रविकल्पेन दुर्ध्यानं देहिनां द्विधा ।
द्विधा प्रशस्तमप्युक्तं धर्मशुक्लविभेदतः ॥

८

स्यातां तत्रार्त्तरौद्रे द्वे ध्यानेऽत्यन्तदुःखदे ।
धर्मशुक्ले ततोऽन्ये द्वे कर्मनिर्मूलनक्षमे ॥

**( आर्त्त ध्यान के चार भेद )**

९

ज्वलनवनविषास्त्रव्यालशार्दूलदैत्यैः,
अकृजलजविलसत्त्वैर्दुर्जनारातिभूपैः ।
स्वजनधनशरीरध्वंसिभिस्तैरनिष्टैः,
भवति यदिह योगादाद्यमार्त्तं तदेतत् ॥

१०

अशेषानिष्टसंयोगे तद्वियोगानुचिन्तनम् ।
यत्स्यात्तदपि तत्त्वज्ञैः पूर्वमार्त्तं प्रकीर्तितम् ॥

११

राज्यैश्वर्यकलत्रबान्धवसुहृत्सौभाग्यभोगात्यये,
चित्तप्रीतिकरप्रसन्नविषयप्रध्वंसभावेऽथवा ।
संत्रासभ्रमशोकमोहविवशैर्यत् खिद्यतेऽहर्निशम्,
तत्स्यादिष्टवियोगजं तनुमतां ध्यानं कलङ्कास्पदम् ॥

१२

दृष्टश्रुतानुभूतैस्तैः पदार्थैश्चित्तरञ्जकैः ।
वियोगे यन्मनः खिन्नं स्यादार्त्तं तद्द्वितीयकम् ॥

१३

कासश्वासभगन्दरोदरजराकुष्ठातिसारज्वरैः,
पित्तश्लेष्ममरुत्प्रकोपजनितैः रोगैः शरीरान्तकैः ।
स्यात्सत्त्वप्रबलैः प्रतिक्षणभवैर्यद्व्याकुलत्वं नृणाम्,
तद्रोगार्तमनिन्दितैः प्रकटितं दुर्वारदुःखाकरम् ॥

१४

भोगा भोगीन्द्रसेव्यास्त्रिभुवन-
जयिनी रूपसाम्राज्यलक्ष्मी-
राज्यं क्षीणारिचक्रं विजितसुर-
वधूलास्यलीला युवत्यः ।
अन्यच्चानन्दभूतं कथमिह—
भवतीत्यादिचिन्तासुभाजाम्,
यत्तद्भोगार्थमुक्तं परम—
गुणधरैर्जन्मसन्तानमूलम् ॥

१५

हिंसाकर्मणि कौशलं निपुणता पापोपदेशे भृशम्,
दाक्ष्यं नास्तिकशासने प्रतिदिनं प्राणातिपाते रतिः ।
संवासः सह निर्दयैरविरतं नैसर्गिकी क्रूरता,
यत्स्याद्देहभृतां तदत्र गदितं रौद्रं प्रशान्ताशयैः ॥

१६

अभिलषति नितान्तं यत्परस्यापकारम्,
व्यसनविशिखभिन्नं वीक्ष्य यत्तोषमेति ।
यदिह गुणगरिष्ठं द्वेष्टि दृष्ट्वान्यभूतिं,
भवति हृदि सशल्यस्तद्धि रौद्रस्य लिङ्गम् ॥

१७

ज्ञानवैराग्यसम्पन्नः संवृतात्मा स्थिराशयः ।
मुमुक्षुरुद्यमी शान्तो ध्याने धीरः प्रशस्यते ॥

१८

ध्यानध्वंसनिमित्तानि तथान्यान्यपि भूतले ।
न हि स्वप्नेऽपि सेव्यानि स्थानानि मुनिसत्तमैः ॥

१९

किञ्च क्षोभाय मोहाय यद्विकाराय जायते ।
स्थानं तदपि मोक्तव्यं ध्यानविध्वंसशङ्कितैः ॥

२०

यत्र रागादयो दोषा अजस्रं यान्ति लाघवम् ।
तत्रैव वसतिः साध्वी ध्यानकाले विशेषतः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३२

क्व च ननु जनकाधिराजपुत्री,
क्व च दशकन्धरमन्दिरे निवासः ।
अति खलु विषमः पुरा कृतानां,
भवति हि जन्तुषु कर्मणां विपाकः ॥

३३

यदेव कर्म केवलं, पुराकृतं शुभाशुभम् ।
तदेव पुत्र सार्थकं, भवत्यमुत्र गच्छतः ॥

३४

पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान् ।
रामेणापि कथं न हेम हरिणस्यासम्भवो लक्षितः ॥
अक्षैश्चापि युधिष्ठिरेण सहसा प्राप्तो ह्यनर्थः कथम् ।
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ॥

३५

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं ।
तत्प्राप्नोति मरुस्थलेपि नितरां मेरौ ततो नाधिकम् ॥
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः ।
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥

३६


नैवाकृतिः फलति नैव कुलं न शीलम्,
विद्यापि नैव न च जन्मकृतापि सेवा ।
कर्माणि पूर्वतपसा किल संचितानि,
काले फलन्ति पुरुषस्य यथेह वृक्षाः ॥

३७

द्यूतेन धनमिच्छन्ति, मानमिच्छन्ति सेवया ।
भिक्षया भोगमिच्छन्ति, ते दैवेन विडंबिताः ॥

३८

कृतकर्मक्षयो नास्ति, कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् ॥

३९

त्रिभिर्वर्षैस्त्रिभिर्मासै–स्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युग्रपुण्यपापाना-मिहैव फलमश्नुते ॥

४०

एक उत्पद्यते जन्तु–रेक एव विपद्यते ।
कर्माण्यनुभवत्येकः, प्रचितानि भवान्तरे ॥

४१

यथा ह्येकेन चक्रेण, न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण, विना दैवं न सिध्यति ॥

४२

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी,
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या,
यत्ने कृते यदि न सिध्यति कोत्र दोषः ॥

४३

यद्यपि तरणेः किरणैः सकलमिदं विश्वमुज्ज्वलं विदधे ।
तदपि न पश्यति घूकः पुराकृतं भुज्यते कर्म ॥

४४

नैवागच्छंति नो यांति, स्वयं जीवा हि पंगुवत् ।
कर्म्मारिभिश्च नीयंते, चतुर्गतिषु लोलुपाः ॥

४५

स्वकृतैर्जायते जन्तुः, स्वकृतैरेव वर्धते ।
सुखदुःखे तथा मृत्युं, स्वकृतैरेव विन्दति ॥

४६

यन्मया परिजनस्यार्थे कृतं कर्म शुभाशुभम् ।
एकाकी तेन दह्येऽहं, गतास्ते फलभोगिनः ॥

४७

स्वयं कर्म करोत्यात्मा, स्वयं तत्फलमश्नुते ।
स्वयं भ्रमति संसारे, स्वयं मोक्षञ्च गच्छति ॥

४८

सुखस्याऽनन्तरं दुःखं दुःखस्याऽनन्तरं सुखम् ।
सुखदुःखौ समाक्रान्तौ चक्रवत् परिवर्तते ॥ 

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

४९

यः सुन्दरस्तद्वनिता कुरूपा,
या सुन्दरी सा पतिरूपहीना ।
यत्रोभयं तत्र दरिद्रता च,
विधेर्विचित्राणि विचेष्टितानि ॥

५०

नादत्ते कस्यचित्पापं, न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं, तेन मुह्यन्ति जन्तवः ॥

५१

कर्मणा जायते जन्तुः, कर्मणैवाभिलीयते ।
सुखं दुःखं भयं क्षेमं, कर्मणैवाभिपद्यते ॥

५२

कान्तं वक्ति कपोतिकाकुलतया नाथान्तकालोऽधुना ।
व्याधोऽधो धृतचापसज्जितशरः श्येनः परिभ्राम्यति ॥
इत्थं सत्यहिना स दष्ट इषुणा श्येनोपि तेनाहतः ।
तूर्णं तौ तु यमालयं प्रतिगतौ दैवी विचित्रा गतिः ॥

५३

खनन्तु सप्त पातालं, भ्रमन्त्वाऽऽकाशमण्डले ।
धावन्तु सकलां पृथ्वीं, नादत्तमुपतिष्ठते ॥



५४

यस्मिन् काले च यद्देशे, यन्मुहूर्ते च यद्दिने ।
हानिर्मृत्युर्यशोलाभस्तत्तत्काले भविष्यति ॥

५५

आपदर्थे धनं रक्षेच्छ्रीमतश्च किमापदः ।
कदाचिच्चलिता लक्ष्मीः संचितापि विनश्यति ॥

५६

पिंडीभूतः पटः क्लिन्नश्चिरकालेन शुष्यति ।
प्रसारितः स एवाशु, तथा कर्माप्युपक्रमैः ॥

५७

खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके ।
वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः ॥
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः ।
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥

५८

अकृतेऽप्युद्यमे पुंसामन्यजन्मकृतं फलम् ।
शुभाशुभं समभ्येति, विधिना सन्नियोजितम् ॥

५९

शशिदिवाकरयोर्ग्रहपीडनं,
गजभुजङ्गमयोरपि बन्धनम् ।
मतिमतां च विलोक्य दरिद्रतां,
विधिरहो बलवानिति मे मतिः ॥

६०

अरक्षितं तिष्ठति दैवरक्षितं,
सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः,
कृतप्रयत्नोऽपि गृहे न जीवति ॥

६१

निमग्नस्य पयोराशौ, पर्वतात् पतितस्य च ।
तक्षकेणापि दष्टस्य, त्वायुर्मर्माणि रक्षति ॥

६२

नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि ।
कुशाग्रेणैव संस्पृष्टः प्राप्तकालो न जीवति ॥

६३

आकाशमुत्पततु गच्छतु वा दिगन्त–
मम्भोनिधिं विशतु तिष्ठतु वा यथेच्छम् ।
जन्मान्तरार्जितशुभाशुभकृन्नराणां,
छायेव न त्यजति कर्मफलानुबन्धः ।

६४

भीमं वनं भवति तस्य पुरं प्रधानं,
सर्वो जनः सुजनतामुपयाति तस्य ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा,
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥

६५

स ज्ञानदर्शनावरणवेद्यमोहायुषां तथा नाम्नः ।
गोत्रान्तराययोश्चेति, कर्मबन्धोऽष्टधा मौलः ॥

६६

ज्ञानस्य ज्ञानिनां वाऽपि निन्दाप्रद्वेषमत्सरैः ।
उपघातैश्च विघ्नैश्च, ज्ञानघ्नं कर्म बध्यते ॥

६७

स्नेहाभ्यक्तशरीरस्य, रेणुनाऽऽश्लिष्यते यथा गात्रम् ।
रागद्वेषाक्लिन्नस्य, कर्मबन्धो भवत्येवम् ॥

६८

स्वयं कृतानि कर्माणि, स्वयमेवानुभूयते ।
कर्मणामकृतानां च, नास्ति भोगः कदाऽपि हि ॥

६९

न कर्मणा पितुः पुत्रः, पिता वा पुत्रकर्मणा ।
मार्गेणान्येन गच्छन्ति, बद्धाः सुकृतदुष्कृतैः ॥

७०

यदिह क्रियते कर्म, तत् परत्रोपभुज्यते ।
मूलसिक्तेषु वृक्षेषु, फलं शाखासु जायते ॥

७१

ग्रहा रोगा विषाः सर्पा, डाकिन्यो राक्षसास्तथा ।
पीडयन्ति नरं पश्चात्, पीडितं पूर्वकर्मणा ॥

७२

यादृशं क्रियते कर्म, तादृशं भुज्यते फलम् ।
यादृशमुप्यते बीजं, तादृशं प्राप्यते फलम् ॥

७३

निपानमिव मण्डूकाः, सरः पूर्णमिवाण्डजाः ।
शुभकर्माणमायाति, तद्वशाः सर्वसम्पदः ॥

७४

नो मृत्तिका नैव जलं, नाप्यग्निः कर्मशोधनः ।
शोधयन्ति बुधाः कर्म, ज्ञानध्यानतपोजलैः ॥

७५

यत्र वा तत्र वा यातु यद्वा तद्वा करोत्वसौ ।
तथापि मुच्यते प्राणी न पूर्वकृतकर्मणा ॥

७६

स्वयं कृतं कर्म यदात्मना पुरा,
फलं तदीयं लभते शुभाशुभम् ।
परेण दत्तं यदि लभ्यते स्फुटं,
स्वयं कृतं कर्म निरर्थकं तदा ॥

७७

इत्थं कर्मकटुप्रपाककलिताः संसारघोरार्णवे,
जीवा दुर्गतिदुःखवाडवशिखासन्तानसंतापिताः ।
मृत्यूत्पत्तिमहोर्मिजालनिचिता मिथ्यात्ववातेरिताः,
क्लिश्यन्ते तदिदं स्मरन्तु नियतं धन्याः स्वसिद्ध्यर्थिनः ॥

## संसारस्वरूप ।

१

जन्म दुःखं जरा दुःखं, मृत्युदुःखं पुनः पुनः ।
संसारसागरे दुःखं, तस्माज्जागृत जागृत ॥

२

माता नास्ति पिता नास्ति, नास्ति भ्राता सहोदरः ।
अर्थो नास्ति गृहो नास्ति, तस्माज्जागृत जागृत ॥

३

कामः क्रोधस्तथा लोभो, देहे तिष्ठन्ति तस्कराः ।
ज्ञानखड्गप्रहारेण, तस्माज्जगृत जागृत ॥

४

आशा हि लोकान्बध्नाति, कर्मणा बहुचिन्तया ।
आयुःक्षयं न जानाति, तस्माज्जागृत जागृत ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

५

एके गायन्ति नृत्यन्ति, रुदन्त्यन्ये सुदुःखिताः ।
क्रीडन्त्येके हसन्त्येके, चित्राः संसारवृत्तयः ॥

६

रम्यं हर्म्यतलं बलं च बहुलं कान्ता मनोहारिणी ।
जात्यश्वाश्चतुला गजा गिरिनिभा आज्ञावशा आत्मजाः ॥
एतान्येकदिनेऽखिलानि नियतं त्यक्ष्यंति ते सद्गतिं ।
नेत्रे मूढ! निमीलिते तनुरियं ते नास्ति किं चापरम् ॥

७

देवलोके नृलोके च, तिरश्चि नरकेऽपि च ।
न सा योनिर्न तद्रूपं, न स देशो न तत्कुलम् ॥

८

न तद्दुःखं सुखं किञ्चिन्न पर्यायः स विद्यते ।
यत्र ते प्राणिनः शश्वद्यातायातैर्न खण्डिताः ॥
स्वर्गी पतति साक्रंदं, श्वा स्वर्गमधिरोहति ।
श्रोत्रियः सारमेयः स्यात् कृमिर्वा श्वपचोऽपि वा ॥

९

क्वचिद्वीणावादः क्वचिदपि च हाहेति रुदितं ।
क्वचिन्नारी रम्या क्वचिदपि जराजर्जरवपुः ॥
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहो ।
न जाने संसारः किममृतमयः किं विषमयः ॥

१०

नलिनीदलगतजलमतितरलं ।
तद्वज्जीवितमतिशयचपलम् ॥
विद्धि व्याधिव्यालग्रस्तं ।
लोकं शोकहतं च समस्तं ॥

११

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं ।
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ॥
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते ।
जीवे वारितरङ्गबुद्बुदसमे सौख्यं कुतः प्राणिनाम् ॥

१२

अनेक शास्त्रं बहुवेदितव्यमल्पश्च कालो बहवश्च विघ्नाः ।
यत्सार भूतं तदुपासितव्यं, हंसो यथा क्षीरमिवाम्बुमध्यात्

१३

निर्विवेकतया बाल्यं, कामोन्मादेन यौवनम् ।
वृद्धत्वं विकलत्वेन, सदा सोपद्रवं नृणाम् ॥

१४

प्रातर्मूत्रपुरीषाभ्यां, मध्याह्ने क्षुत्पिपासया ।
तृप्ताः कामेन बाध्यन्ते, प्राणिनो निशि निद्रया ॥

१५

गतसारेऽत्र संसारे, सुखभ्रान्तिः शरीरिणाम् ।
लालापानमिवाङ्गुष्ठे, बालानां स्तन्यविभ्रमः ॥

१६

दिनमेकं शशी पूर्णः, क्षीणस्तु बहुवासरान् ।
सुखाद् दुःखं सुराणामप्यधिकं का कथा नृणाम् ॥

१७

संसारविषवृक्षस्य, द्वे फले ह्यमृतोपमे ।
शास्त्रामृतरसास्वाद आलापः सज्जनैः सह ॥

१८

एता याः प्रेक्षसे लक्ष्मीश्छत्रचामरचञ्चलाः ।
स्वप्न एषो महाबुद्धे, दिनानि त्रीणि पञ्च वा ॥

१९

एकोऽद्य प्रातरपरे, पश्चादन्ये पुनः परे ।
सर्वे निःसीम्नि संसारे, यान्ति कः केन शोच्यते ॥

२०

यथा काष्ठञ्च काष्ठञ्च समेयातां महोदधौ ।
समेत्य च व्यपेयातां, तद्वद् भूतसमागमः ॥

२१

यथा हि पथिकः कश्चिच्छायामाश्रित्य तिष्ठति ।
विश्रम्य च पुनर्गच्छत्तद्वद् भूतसमागमः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२२

पुत्रमित्रकलत्रेषु, सक्ताः सीदन्ति जन्तवः ।
सरःपङ्कार्णवे मग्ना जीर्णा वनगजा इव ॥

२३

रम्भागर्भसमः सुखी शिखिशिखावर्णाभिरुच्चैरगः ।
सूचीभिः प्रतिरोमभेदितवपुस्तारुण्यपुण्यः पुमान् ॥
दुःखं यल्लभते तदष्टगुणितं स्त्रीकुक्षिमध्यस्थितौ ।
संपद्येत ततोऽप्यनन्तगुणितं जन्मक्षणे प्राणिनाम् ॥

२४

कस्य दोषः कुले नास्ति, व्याधिना को न पीडितः ।
व्यसनं केन न प्राप्तं, कस्य सौख्यं निरन्तरम् ॥

२५

वयसि गते कः कामविकारः, शुष्के नीरे कः कासारः ।
क्षीणे वित्ते कः परिवारो, ज्ञाते तत्त्वे कः संसारः ॥

२६

का तव कान्ता ! कस्ते पुत्रः, संसारोऽयमतीव विचित्रः ।
कस्य त्वं वा कुत आयातः, तत्त्वं चिन्तय तदिदं भ्रातः ॥

२७

माता पुत्री स्वसा भार्या सैव सम्पद्यतेऽङ्गजा ।
पिता पुत्रः पुनः सोऽपि लभते पौत्रिकं पदम् ॥

२८

रागद्वेषमयो जीवः, कामक्रोधवशंगतः ।
लोभमोहमदाविष्टः, संसारे संसरत्यसौ ॥

२९

गलच्चक्षुर्मिलज्जानुः, प्रस्खलंश्च पदे पदे ।
मक्षिकालक्षसंयुक्तो, भट्टतट्टुर्विराजते ॥

३०

न पिता भ्रातरः पुत्रा, न भार्या न च बान्धवाः ।
न शक्ता मरणात् त्रातुं, मग्नाः संसारसागरे ॥

३१

केनाञ्जितानि नयनानि मृगाङ्गनानां ।
कोऽलङ्करोति रुचिराङ्गरुहान्मयूरान् ? ॥
कश्चोत्पलेषु दलसन्निचयं करोति ।
को वा दधाति विनयं कुलजेषु पुंसु ? ॥

३२

कः कण्टकानां प्रकरोति तैक्ष्ण्यं ।
विचित्रभावं मृगपक्षिणां च ॥
स्वभावतः सर्वमिदं प्रवृत्तं ।
न कामचारोऽस्ति कुतः प्रयत्नः ? ॥

३३

न समा वासराः सर्वे, नैकरूपमिदं जगत् ।
भवन्ति विविधैर्भावैः, प्रायशः प्राणिनां दशाः ॥

३४

स्वप्ने यथाऽयं पुरुषः प्रयाति, ददाति गृह्णाति करोति वक्ति
निद्राक्षये तच्च न किञ्चिदस्ति, सर्वं तथेदं हि विचार्यमाणम्

३५

यावज्जननं तावन्मरणं, तावज्जननीजठरे शयनम् ।
इति संसारे स्फुटतरदोषः, कथमिह मानव ! तव संतोषः

३६

आधिव्याधिजरामृत्युज्वालाशतसमाकुलः ।
प्रदीप्ताङ्गारकल्पोऽयं, संसारः सर्वदेहिनाम् ॥

३७

सर्वत्र सर्वस्य सदा प्रवृत्ति–
र्दुःखस्य नाशाय सुखस्य हेतोः ॥
तथाऽपि दुःखं न विनाशमेति ।
सुखं न कस्यापि भजेत् स्थिरत्वम् ॥

३८

यथा मृगा मृत्युभयेन भीता–
उद्धृत्य कर्णौ न करन्ति निद्राम् ॥
एवं बुधा ज्ञानसमन्विता हि ।
संसारभीता न करन्ति पापम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## द्यूत ।

१

न श्रियस्तत्र तिष्ठन्ति, द्यूतं यत्र प्रवर्तते ।
न वृक्षजातयस्तत्र, विद्यन्ते यत्र पावकः ॥

२

द्यूतमेतत्पुरा कल्पे, दृष्टं वैरकरं नृणाम् ।
तस्माद् द्यूतं न सेवेत, हास्यार्थमपि बुद्धिमान् ॥

३

विषादः कलहो [1]राटिः, कोपो मानः श्रमो भ्रमः ।
पैशुन्यं मत्सरः शोकः सर्वे द्यूतस्य बान्धवाः ॥

४

द्यूतं च मांसं च सुरा च वेश्या, पापर्धिचौर्ये परदारसेवा।
एतानि सप्त व्यसनानि लोके, घोरातिघोरं नरकं नयन्ति

५

एकैकव्यसनाद् दुःखम्, प्राप्ताश्चैते विचक्षणाः ।
सप्तव्यसनतः किं न, प्राणी प्राप्तोऽति दुःखिताम् ॥

६

नास्ति द्यूतसमं पापं, नास्ति द्यूतसमो रिपुः ।
पाण्डवाः प्रौढपुण्याश्च, प्राप्ताः दुःखं तु द्यूततः ॥

[1] राड़, रार

७

अन्ये नलादयो भूपाः, बहवो दुःखमुल्बणाम् ।
प्राप्ता द्यूतफलेनैव, कस्तान् हि वदितुं क्षमः ॥

८

द्यूतं हिंसाकरं लोके, द्यूतं कूटप्रभाषितम् ।
द्यूतेन चौर्यभावोऽपि, द्यूताद् दुःखं नृणां खलु ॥

९

द्यूतं हि सर्वथा त्याज्यम्, प्राज्ञैर्बुद्धिविशालिभिः ।
नरकं प्राप्यते द्यूताद्, द्यूतात् तिर्यञ्चता भवेत् ॥

१०

एकया जिह्वया दुःखं, प्रोच्यते द्यूतजं फलम् ।
अतो वै सर्वथा त्याज्यम्, द्यूतं संसारवर्द्धनम् ॥

## मांस ।

१

मद्यं मांसाशनं रात्रौ–भोजनं कन्दभक्षणं ।
ये कुर्वन्ति वृथा तेषां, तीर्थयात्रा जपस्तपः ॥

२

न भक्षयति यो मांसं, न च हन्यान्न घातयेत् ।
तन्मित्रं सर्वभूतानां मनुः स्वायम्भवोऽब्रवीत् ॥

३

नहि मांसं तृणात्काष्ठा–दुपलाद्वाऽपि जायते ।
हत्वा जन्तुं ततो मांसं, तस्माद्दोषस्तु भक्षणे ॥

४

यदि चेत्खादको न स्यान्न तदा घातको भवेत् ।
घातकः खादकार्थाय, तद्घातयति वै नरः ॥

५

भक्षयित्वाऽपि यो मांसं, पश्चादपि निवर्तते ।
तस्यापि सुमहान् धर्मो, यः पापाद्विनिवर्तते ॥

६

ये भक्षयन्ति मांसानि, भूतानां जीवितैषिणाम् ।
भक्ष्यन्ते तेऽपि भूतैस्तैरिति मे नास्ति संशयः ॥

७

शुक्राच्च तात संभूतिर्मांसस्येह न संशयः ।
भक्षणे तु महान्दोषो निवृत्त्या पुण्यमुच्यते ॥

८

गृहासक्तस्य नो विद्या, नो दया मांसभोजिनः ।
द्रव्यलुब्धस्य नो सत्यं, [1]स्त्रैणस्य न पवित्रता ॥

[1] कामी



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

मांसभक्षैः सुरापानैर्मूर्खैश्चाक्षरवर्जितैः ।
पशुभिः पुरुषाकारैर्भाराक्रान्तास्ति मेदिनी ॥

१०

सर्वं शुक्रं भवेद् ब्रह्मा, विष्णुर्मांसं प्रवर्तते ।
ईश्वरोऽस्थिनिसंघातं, तस्मान्मांसं न भक्षयेत् ॥

११

भिक्षो मांसनिषेवणं किमुचितं किं तेन मद्यं विना ।
मद्यं चापि तव प्रियं प्रियमहो वाराङ्गनाभिः सह ॥
वारस्त्रीरतये कुतस्तव धनं द्यूतेन चौर्येण वा ।
चौर्यद्यूतपरिश्रमोऽपि भवतो भ्रष्टस्य का वा गतिः ॥

१२

मां स भक्षयिताऽमुत्र, यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं, प्रवदन्ति मनीषिणः ॥

१३

योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम् ।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ॥

१४

स्वमांसं परमांसेन, यो वर्द्धयितुमिच्छति ।
नास्ति क्षुद्रतरस्तस्मात् स नृशंसतरो नरः ॥

१५

परमांसानि भुक्तानि, विविधानि पुरा भवेत् ।
इदं ते हि शरीरोत्थं, कथं नो भुज्यते त्वया ॥

१६

पच्यते पावके पापैः, पील्यते तिलवत् खलैः ।
दह्यते दहने रौद्रे, नरके घोरवेदने ॥

१७

न पलं जायते वृक्षात्, न भूम्यां नैव पर्वते ।
जन्तूनां घाततो नूनं, पलं भवति निश्चितम् ॥

१८

कुलशीलवता तस्मान्मांसं त्याज्यं सदैव हि ।
इहलोकेऽप्यशुचिता, परलोके नरके व्रजेत् ॥

१९

निन्द्यं पापकरं परं शुचिहरम् दुःखस्य मूलं पलम् ।
त्याज्यं भव्यजनैर्विवेकसहितैर्लोकद्वये निन्दितम् ॥

२०

नाकृत्वा प्राणिनां हिंसा, मांसमुत्पद्यते क्वचित् ।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ॥

२१

मांसादनात्प्रणश्यन्ति, देहश्रीः सुमतिः सुखम् ।
शौचं सत्यं यशः पुण्यं, श्रद्धा-विश्वाससद्गतिः ॥

२२

प्रपश्यन्ति पशून् यत्र, मनस्तत्र प्रवर्तते ।
रागिता मांसपुष्टे स्याद्, दुर्बलत्वे विरागता ॥

२३

पापकर्मघटे पूर्णे, रौद्रध्यानवशंगते ।
मांसभुग् मरणं प्राप्य, व्यथां सहते दुर्गतेः ॥

२४

तिलसर्षपमात्रं तु, मांसं यो भक्षयेन्नरः ।
स एव नरकं याति, यावच्चन्द्रदिवाकरौ ॥

२५

मांसाशिनश्च दृश्यन्ते, रोगार्त्ता हीनदुर्बलाः ।
अमांसादा नीरोगाश्च, बलवन्तः सुखान्विताः ॥

२६

यावज्जीवं तु यो मांसं, विषवत् परिवर्जयेत् ।
वसिष्ठो भगवानाह, स्वर्गलोकं स गच्छति ॥

२७

सा रेवती या नरके प्रविष्टा ।
मांसादनाद् भीमकुकर्मकर्त्री ॥
श्रीश्रेणिकेनापि पलाशनाच्च ।
प्राप्ता हि पीडा नरकस्य तीव्रा ॥



For Private And Personal Use Only

२८

स्नेहो दयाऽपि हृदि काऽऽमिषलोलुपानां ? ।
किं विह्वलाऽपि पतिमांसदलानि नैच्छत् ? ॥
नाश्नाति किं निजकुटुम्बमपि द्विजिह्वी ? ।
श्वानं स्वमन्यदपि किं दहतीह नाग्निः ? ॥

२९

मांसाशिनो नास्ति दयाऽसुभाजां,
दयां विना नास्ति जनस्य पुण्यम् ।
पुण्यं विना याति दुरन्तदुःखं,
संसारकांतारमलभ्यपारम् ॥

३०

वरं विषं भक्षितमुग्रदोषं, यदेकवारं कुरुतेऽसुनाशम् ।
मांसं महादुःखमनेकवारं, ददाति जग्धं मनसापि पुंसाम् ।

३१

चिरायुरारोग्यसुरूपकान्ति-प्रीतिप्रतापप्रियवादिताद्याः
गुणा विनिंद्यस्य सतां नरस्य, मांसाशिनः सन्ति परत्र नेमे

३२

मांसाशनाज्जीववधानुमोद-स्ततो भवेत्पापमनंतमुग्रम्
ततो व्रजेद्दुर्गतिमुग्रदोषां, मत्वेति मांसं परिवर्जनीयम्

३३

करोति मांसं बलमिन्द्रियाणां,
ततोऽभिवृद्धिं मदनस्य तस्मात् ।
करोत्ययुक्तिं प्रविचिन्त्य बुद्ध्या,
त्यजन्ति मांसं त्रिविधेन सन्तः ॥

## मदिरा ।

१

येषां पश्यत भो ! सुराव्यसनिनां दुःखान्वितां दुर्दशां ।
गच्छन्तोऽपि पतन्ति दृष्टिविकला मार्गे किलेतस्ततः ॥
अज्ञानात्प्रलपन्त्यसंगतमथाऽव्यक्तं च तुच्छं वचो ।
दण्डादण्डि परस्परं विदधते निष्कारणं बालिशाः ॥

२

ख्यातं भारतमण्डले यदुकुलं श्रेष्ठं विशालं परं ।
साक्षाद्देवविनिर्मिता वसुमतीभूषा पुरी द्वारिका ॥
एतद् युग्मविनाशनं च युगपज्जातं क्षणात्सर्वथा ।
तन्मूलं मदिरा नु दोषजननी सर्वस्वसंहारिणी ॥

३

एकतश्चतुरो वेदान्, ब्रह्मचर्यं तथैकतः ।
एकतः सर्वपापानि मद्यपानं तथैकतः ॥

४

कैवल्यं धरणीपातमयथोचितजल्पनम् ।
सन्निपातस्य चिह्नानि, मद्यं सर्वाणि दर्शयेत् ॥

५

मद्यपस्य कुतः सत्यं, दया मांसाशिनः कुतः ।
कामिनश्च कुतो विद्या, निर्धनस्य कुतः सुखम् ॥

६

अयुक्तं बहु भाषन्ते, यत्र कुत्रापि शेरते ।
नग्ना विक्षिप्य गात्राणि, बालका इव मद्यपाः ॥

७

चित्ते भ्रान्तिर्जायते मद्यपानाद्भ्रान्तं-
चित्तं पापचर्यामुपैति ।
पापं कृत्वा दुर्गतिं यान्ति मूढा-
स्तस्मान्मद्यं नैव पेयं न पेयम् ॥

८

यत्पीत्वा गुरवेऽपि कुप्यति विना हेतोस्तथा रोदिति ।
भ्रान्तिं याति करोति साहसमपि व्याधेर्भवत्यास्पदम् ॥
कौपीनं विवृणोति लोकपुरतोऽप्युन्मत्तवच्चेष्टते ।
तल्लजा परिपन्थिमोहजननं मद्यं न पेयं बुधैः ॥

९

नादत्तमिच्छेन्न पिबेच्च मद्यं, प्राणान्न हिंसेन्न वदेच्च मिथ्या
परस्य दारान्मनसाऽपि नेच्छेद्यः स्वर्गमिच्छेद् गृहवत्प्रवेष्टुम्


२०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१०

बुद्धिं हिनस्ति सर्वां, मिथ्या प्रलपति हि विकलया बुद्ध्या
कामयते चागम्यं, सावद्यं मद्यपानमत्तः ॥

११

यादवा मद्यदोषेण, सर्वनाशं यथा गताः ।
तदा सामान्यलोकस्य, दुःखस्य वर्णना हि का ॥

१२

मद्यं हि सर्वथा निन्द्यं, त्याज्यं वै बुद्धिशालिभिः ।
मद्यदोषेण ये ये हि, प्राप्ता दुःखं नरा भुवि ॥

१३

कस्तांस्तान् गदितुं शक्तो, ज्ञानहीनो नरोऽपरः ।
मद्याद्वै नरकं यान्ति, जीवा संसर्गतोऽपि वा ॥

१४

मद्यपाने कुतः शौचं, मद्यं लोकेषु गर्हितम् ।
मद्याद्धनविनाशं च, निन्द्यं मद्यं हि सर्वथा ॥

१५

षट्-पञ्चाशत्-कोटी च, कुलानि प्रथितानि वै ।
यादवानां परं दुःखं, प्राप्तं हि मद्यतो ध्रुवम् ॥

१६

यदुवंशः क्षयं यातः दग्धा हि द्वारिका तथा ।
एकेन मद्यदोषेण, मद्यं त्याज्यं ततो नृभिः ॥

१७

दोषाणां कारणं मद्यं, मद्यं कारणमापदाम् ।
रोगातुर इवापथ्यं, तस्मान्मद्यं विवर्जयेत् ॥

१८

मद्यपाने कृते क्रोधो, मानो लोभश्च जायते ।
मोहश्च मत्सरश्चैव, दुष्टभाषणमेव च ॥

१९

मधुपाने मतिभ्रंशो, नराणां जायते खलु ।
धर्मेण तेभ्यो दातृणां, न ध्यानं न च सत्क्रिया ॥

२०

विवेकः संयमो ज्ञानं, सत्यं शौचं दया क्षमा ।
मद्यात् प्रलीयते सर्वं, तृणानि वह्निकणादिव ॥

२१

वारुणीपानतो यान्ति, कान्तिकीर्त्तिमतिश्रियः ।
विचित्राश्चित्ररचना, विलुठत्कज्जलादिव ॥

२२

देवताराधनं चैव गुरूणां चैव सेवनम् ।
शिष्टसंगोऽपि नैवास्य, न धर्मो न च साधनम् ॥

२३

मद्यपानरसे मग्नो, नग्नः स्वपिति [1]चत्वरे ।
गूढं च स्वमभिप्रायं, प्रकाशयति लीलया ॥

२४

न जानाति परं स्वं वा, मद्याच्चलितचेतनः ।
स्वामीयति वराकः स्वं, स्वामिनं किङ्करीयति ॥

२५

मद्यमत्तो न जानाति, स्वजनान्यजनानि च ।
न शत्रुं नैव मित्रं च, न कलत्रं न मातरम् ॥

२६

मद्यपस्य शवस्येव, लुठितस्य चतुष्पथे ।
मूत्रयन्ति मुखे श्वानो, व्यात्ते विवरशङ्कया ॥

२७

संततिनास्ति वंध्यायाः, कृपणस्य यशो न हि ।
कातरस्य जयो नैव, मद्यपस्य न सद्गतिः ॥

२८

हसति नृत्यति गायति वल्गति,
भ्रमति धावति मूर्छति शोचते ।
पतति रोदिति जल्पति गद्गदं,
धमति ताम्यति मद्यमदातुरः ॥

१ चौक

२१

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# वेश्या ।

१

वेश्यासौ मदनज्वाला, रूपेन्धनसमेधिता ।
कामिभिर्यत्र हूयन्ते, यौवनानि धनानि च ॥

२

अयं च सुरतज्वालः, कामाग्निः प्रणयेन्धनः ।
नराणां यत्र हूयन्ते, यौवनानि धनानि च ॥

३

इह सर्वस्वफलिनः, कुलपुत्रमहाद्रुमाः ।
निष्फलत्वमलं यान्ति, वेश्या–विहग–भक्षिताः ॥

४

जात्यन्धाय च दुर्मुखाय च, जराजीर्णाखिलाङ्गाय च ।
ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च ॥
¹यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया ।
²पण्यस्त्रीषु विवेककल्पलतिका शस्त्रीषु रज्येत कः ॥

५

एता हसन्ति च रुदन्ति च वित्तहेतो–
विश्वासयन्ति पुरुषं न च विश्वसन्ति ।
तस्मान्नरेण कुलशीलसमन्वितेन,
वेश्याः श्मशानघटिका इव वर्जनीयाः ॥

६

तपो व्रतं यशो विद्या, कुलीनत्वं दमो वयः ।
छिद्यन्ते वेश्यया सद्यः, कुठारेण लता यथा ॥

७

दूरस्थाः पर्वता रम्या, वेश्या च मुखमण्डने ।
युद्धस्य वार्ता रम्या च, त्रीणि रम्याणि दूरतः ॥

८

सद्भावो नास्ति वेश्यानां, स्थिरता नास्ति सम्पदाम् ।
विवेको नास्ति मूर्खाणां, ¹विनाशो नास्ति कर्मणाम् ॥

९

सत्यं शौचं शमं शीलं, संयमं नियमं यमम् ।
प्रविशन्ति बहिर्मुक्त्वा, ²विटा पण्याङ्गना गृहे ॥

१०

जननी जनको भ्राता, तनयस्तनया स्वसा ।
न सन्ति वल्लभास्तस्य, गणिका यस्य वल्लभा ॥

११

का प्रीतिः सह मार्जारैः, का प्रीतिरवनीपतौ ।
गणिकाभिश्च का प्रीतिः, का प्रीतिर्भिक्षुकैः सह ॥

१२

लोभयुक्ता गुणैर्मुक्ता, रक्तेऽसौ जीवहारिणी ।
त्याज्या वेश्या बुधैर्निन्द्या, विषमिश्रं जलं यथा ॥

१३

अशुचेर्मन्दिरं वेश्या, वेश्या धर्मविनाशिनी ।
धनहानिकरा वेश्या, वेश्या कीर्तिविनाशिका ॥

१४

वेश्या सर्वधनापहा सुखहरा धर्मस्य विध्वंसिनी ।
ज्ञात्वैवं चतुरैर्विवेकसहितैः त्याज्या तु वेश्या सदा ॥
सर्वज्ञेन निषेवितं बुधनुतं जैनं दयासंयुतम् ।
यो धर्मं कुरुते कलागुणनिधिः सोऽतीव वन्द्यो नृणाम् ॥

# पारधिः ।

१

वसन्त्यरण्येषु चरन्ति दूर्वाः,
पिबन्ति तोयान्यपरिग्रहाणि ।
तथापि वध्या हरिणां नराणां,
को लोकमाराधयितुं समर्थः ॥

२

वैरिणोऽपि हि मुच्यन्ते, प्राणान्ते तृणभक्षणात् ।
तृणाहाराः सदैवैते, हन्यन्ते पशवः कथम् ॥

---

१ अर्पया, २ गणिकासु ।

१ फलं विना, इति योज्यम्, २ व्यभिचारी ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३

पापाटव्याः प्रभावेण, श्वभ्रे याति नरो ध्रुवम् ।
रौद्रचित्तः सदा क्रोधी, दुष्टधीः पापचिन्तकः ॥

४

जीवानां भयभीतानां, या हिंसा क्रियते सदा ।
पापाटवी तु सा ज्ञेया, तत्र स्यात् शूरता कथम् ॥

५

कण्टकैरपि ये विद्धा, दुःखं जानन्ति चात्मनः ।
ते दुष्टाः भल्लकैः कृत्वा, हिंसां च कुरुते कथम् ॥

६

पापाटव्याः प्रभावेण, रौरवं नरकं गतः ।
सोऽपि व्रतफलेनैव, मुक्तिं यातोऽथ पुण्यतः ॥

## परस्त्रीलम्पटी ।

१

अज्ञानतिमिरग्रस्ता, विषयामिषलम्पटाः ।
भ्रमन्ति शतशो जीवा, नानायोनिषु दुखिताः ॥

२

दिवा पश्यति नो घूकः, काको नक्तं न पश्यति ।
अपूर्वः कोऽपि कामान्धो, दिवा नक्तं न पश्यति ॥

३

परिपूर्णेऽपि तटाके, काकः कुम्भोदकं पिबति ।
अनुकूलेऽपि कलत्रे, नीचः परदारलम्पटो भवति ॥

४

तस्करस्य कुतो धर्मो, दुर्जनस्य कुतः क्षमा ।
वेश्यानां च कुतः स्नेहः, कुतः सत्यं च कामिनाम् ॥

५

स्वदेशजातस्य नरस्य नूनं, गुणाधिकस्यापि भवेदवज्ञा
निजाङ्गना यद्यपि रूपराशिस्तथापि लोकः परदारसक्तः ॥

६

वासरेण क्षुधा नास्ति, निद्रा नास्ति च शर्वरी ।
सकामस्य हि पुरुषस्य, हृदये वसति कामिनी ॥

७

परदारा न गन्तव्या, पुरुषेण विपश्चिता ।
यतो भवंति दुःखानि, नृणां नास्त्यत्र संशयः ॥

८

बधो बन्धो धनभ्रंशस्तापः शोकः कुलक्षयः ।
आयासकलहो मृत्युर्लभ्यन्ते पारदारिकैः ॥

९

परदारा न गन्तव्या, सर्वे वर्णेषु कर्हिचित् ।
नहीदृशमनायुष्यं, त्रिषु लोकेषु विद्यते ॥

१०

परस्त्रीस्मरणेनापि, कोऽस्त्यनर्थागमः क्षयात् ।
दृष्टौ कुलादिहन्तारौ, हा दुर्योधनरावणौ ॥

११

परनारी महामारी, स्रष्टाऽकारि यतस्ततः ।
किमित्येषा पुनर्मृत्युः, सर्वज्ञेनापि निर्मितः ॥

१२

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥

१३

यः कुरुते परयोषित्सङ्गं, वाञ्छति यश्च धनं परकीयम् ।
यश्च सदा गुरुवृद्धविमानी, तस्य सुखं न परत्र न चेह ॥

१४

अतुष्टं स्वेषु दारेषु, चपलं चपलेन्द्रियम् ।
नयन्ति निकृतिप्रज्ञं, परदाराः पराभवम् ॥

१५

प्राणातिपातः स्तैन्यं च, परदाराभिमर्शनम् ।
त्रीणि पापानि कायेन, नित्यशः परिवर्जयेत् ॥

१६

अष्टौ मनुष्या न लभंति निद्रां,
प्रवासिको व्याधियुतश्च रोगी ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्यार्थसक्तौ परदारं रक्तः,
प्रियावियोगी स्वजनेन मुक्तः ॥

१७

वृथा ज्ञानं वृथा ध्यानं, वृथा जापस्तपस्तथा ।
वृथा विनय धर्मश्च, यस्य नार्यां मनो हृतम् ॥

१८

अप्रियं पुरुषं चापि, परद्रोहं परस्त्रियम् ।
अधर्ममनृतं चैव दूरात्प्राज्ञो विवर्जयेत् ॥

१९

कामी त्यजति सद्वृत्तं, गुरोर्वाणीं ह्रियं तथा ।
गुणानां समुदायं च, चेतःस्वास्थ्यं तथैव च ॥

२०

लिङ्गच्छेदं खरारोपं, कुलालकुसुमार्चनम् ।
जननिन्दामभोगत्वं, लभते पारदारिकः ॥

२१

नार्या परिचयं सार्द्धं, कुर्वाणः परकीयया ।
वृद्धोऽपि दूष्यते प्रायस्तरुणो न कथं पुनः ॥

२२

षंढत्वमिन्द्रियच्छेदं, वीक्ष्याब्रह्मफलं सुधीः ।
भवेत्स्वदारसंतुष्टोऽन्यदारान् वा विवर्जयेत् ॥

२३

संभाषयेत् स्त्रियं नैव पूर्वदृष्टां च न स्मरेत् ।
कथां च वर्जयेत्तासां, नो पश्येल्लिखितामपि ॥

२४

परस्त्रीव्यसनान्नूनं, धनहानिं कुलक्षयम् ।
देहनाशादिकं दुःखं, प्राप्तोऽत्राऽसौ दशाननः ॥

२५

यस्याः पतिर्बली रामो वर्त्तते लक्ष्मणाऽन्वितः ।
चोरयित्वाऽस्य रमां वै सुखेन जीव्यते न हि ॥

२६

रावणं स तदा प्राह, श्रृणु भ्रातः ! वचो मम ।
अवश्यं मरणं लोके, सङ्गेन परयोषिताम् ॥

२७

दीयतां रामदेवस्य, मैथिली सुखहेतवे ।
कुलकीर्त्योर्यतो वृद्धिर्जायते नियतं विभो ! ॥

२८

तेन वाक्येन क्रुद्धोऽसौ, जगादेवं विभीषणं ।
रे रे पाप ! दुराचार !, ममाग्रे किं प्रजल्पसि ॥

२९

पश्यतां रावणस्यैव, सर्वराज्यादिनाशनम् ।
दोषेण पररामायाः, कीर्त्तिनाशं तथैव च ॥

३०

परस्त्री हि परं त्याज्या, परलोकविनाशिनी ।
द्रव्यहानिकरी ज्ञेया, कीर्त्तिदेहविनाशिका ॥

३१

परस्त्रीत्यागिनः शूराः, निर्भयाः सर्वविष्टपे ।
विचरन्ति यथेच्छं ते, कीर्त्तियुक्ताः नरोत्तमाः ॥

३२

अन्येषां क्षुद्रलोकानां, दुःखस्य वर्णना हि का ।
इहैव द्रव्यहानिस्तु, परत्र नरकं व्रजेत् ॥

३३

आलिङ्ग्यते वरं क्रुद्धा, व्याघ्री च सर्पिणी तथा ।
न तु कौतूहलेनाऽपि, पररामा कदाचन ॥

३४

परभुक्तां च ये रामां, भुञ्जन्ते वै नराधमाः ।
तैर्भुक्तं हि परोच्छिष्टं, नाऽत्र कार्या विचारणा ॥

३५

इति ज्ञात्वा बुधैस्त्याज्या, पररामाऽतिनिन्दिता ।
सन्तोषो निजनारीभिः, कर्त्तव्यो धर्मलालसैः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# कामदेव ।

१

न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः ।
तथापि जितमेवासी-दमुना भुवनत्रयम् ॥

२

उडुराजमुखी गजराजगति-स्तरुराजविराजितजंघतटि ।
यदि सा दयिता हृदये वसति क्व जपः क्व तपः क्व समाधिरतिः

३

विश्वामित्र-पराशरप्रभृतयो वाताम्बुपर्णाशना-
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ॥
शाल्यन्नं सघृतं पयोदधियुतं ये भुञ्जते मानवाः ।
स्तेषामिन्द्रियनिग्रहो यदि भवेत् विन्ध्यस्तरेत्सागरे ॥

४

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो ।
व्रणी पूयक्लिन्नः कृमिकुलशतैराचिततनुः ॥
क्षुधाक्षमो जीर्णः पीठरककपालावृतगलः ।
शुनीमन्वेति श्वा हतमपि निहन्त्येव मदनः ॥

५

घृतकुम्भसमा नारी, तप्ताङ्गारसमः पुमान् ।
तस्माद् घृतं च वह्निं च, नैकत्र स्थापयेत् बुधः ॥

६

उद्योगः कलहः कण्डूर्द्यूतं मद्यं परस्त्रियः ।
आहारो मैथुनं निद्रा, सेवनात्तु विवर्द्धते ॥

७

दिवा पश्यति नोलूकः, काको नक्तं न पश्यति ।
अपूर्वः कोऽपि कामांधो, दिवा नक्तं न पश्यति ॥

८

न पश्यति हि जन्मान्धः, कामान्धो नैव पश्यति ।
न पश्यति मदोन्मत्तो, ह्यर्थी दोषं न पश्यति ॥

९

यौवनं धनसम्पत्तिः, प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय, किमु यत्र चतुष्टयम् ॥

१०

नास्ति कामसमो व्याधि-र्नास्ति मोहसमो रिपुः ।
नास्ति क्रोधसमो वह्निर्नास्ति ज्ञानात्परं सुखम् ॥

११

राजपत्नी गुरोः पत्नी, भ्रातृपत्नी तथैव च ।
पत्नी माता स्वमाता च, पञ्चैता मातरः स्मृताः ॥

१२

भिक्षाशनं तदपि नीरसमेकवारम् ।
शय्या च भूः परिजनो निजदेहमात्रं ॥
वस्त्रं च जीर्णं शतखंडमयी च कन्था ।
हा हा तथापि विषयान्न परित्यजन्ति ॥

१३

बालरण्डा तपस्वी च, कीलबद्धश्च घोटकः ।
अन्तःपुरगता नारी, नित्यं ध्यायन्ति मैथुनम् ॥

१४

कामः क्रोधस्तथा लोभो, हर्षो मानो मदस्तथा ।
षड्वर्गमुत्सृजेदेवं, तस्मिंस्त्यक्ते सुखी भवेत् ॥

१५

मात्रा स्वस्रा दुहित्रा वा, न विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो, विद्वांसमपि कर्षति ॥

१६

यां चिन्तयामि सततं मयि सा विरक्ता ।
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ॥
अस्मत्कृते च परितुष्यति काचिदन्या ।
धिक् तां च तं च मदनं च इमां च मां च ॥

१७

शूरान्महाशूरतमोऽस्ति को वा,
मनोजबाणैर्व्यथितो नयस्तु ।
प्राज्ञोऽति धीरश्च समोऽस्ति को वा,
प्राप्तो न मोहं ललना-कटाक्षैः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१८

यौवनं विकरोत्येव, मनः संयमिनामपि ।
राजमार्गे प्ररोहन्ति, वर्षाकाले किलांकुराः ॥

१९

कलहान्तानि हर्म्याणि, कुवाक्यान्तं च सौहृदम् ।
कुराजान्तानि राष्ट्राणि, कुकर्मान्तं यशो नृणाम् ॥

२०

विषस्य विषयाणाञ्च, दृश्यते महदन्तरम् ।
उपभुक्तं विषं हन्ति, विषयाः स्मरणादपि ॥

२१

पतङ्गमातङ्गकुरङ्गभृङ्ग–मीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते, यः सेवते पञ्चभिरेव पञ्च ॥

२२

प्राणिघातकवीराश्च, बहवः सन्ति भूतले ।
कन्दर्पघातको वीरः, क्वचित्तिष्ठति वा न वा ॥

२३

न स्त्रीजितः प्रमूढः स्याद्गाढरागवशीकृतः ।
पुत्रशोकाद्दशरथो रामं, [1]जीवं जायाजितोऽत्यजत् ॥

१ रामं ।

२४

तीव्रे तपसि लीनानामिन्द्रियाणां न विश्वसेत् ।
विश्वामित्रोऽपि सोत्कण्ठः कण्ठे जग्राह मेनकाम् ॥

२५

प्रथमे जायते चिंता, द्वितीये द्रष्टुमिच्छति ।
तृतीये दीर्घनिश्वासाश्चतुर्थे भजते ज्वरम् ॥

२६

पञ्चमे दह्यते गात्रं, षष्ठे भुक्तं न रोचते ।
सप्तमे स्यान्महामूर्छा, उन्मत्तत्वमथाष्टमे ॥

२७

नवमे प्राणसन्देहो, दशमे मुच्यतेऽसुभिः ।
एतैर्वेगैः समाक्रान्तो, जीवस्तत्वं न पश्यति ॥

२८

पादाहतः प्रमदया विकसत्यशोकः ।
शोकं जहाति बकुलो मधुसिधुसिक्तः ॥
आलिंगतः कुरबकः कुरुते विकास–
मालोकितस्तिलक उत्कलितो विभाति ॥

२९

कामेन विजितो ब्रह्मा, कामेन विजितो हरिः ।
कामेन विजितः शम्भुः, शक्रः कामेन निर्जितः ॥

३०

किं दुर्लभः सद्गुरुरस्ति लोके,
सत्संगतिर्ब्रह्मविचारणा च ।
त्यागो हि सर्वस्य शिवात्मबोधः,
को दुर्जयस्सर्वजनैर्मनोजः ॥

३१

यासां नाम्नापि कामः स्यात्, सङ्गमं दर्शनं विना ।
तासां दृक्सङ्गमं प्राप्य, न द्रवेत्कौतुकं हितम् ॥

३२

न जातु कामः कामानामुपभोगेन शाम्यति ।
[1]हविषा [2]कृष्णवर्त्मेव, भूय एवाभिवर्धते ॥

३३

उपवासोऽवमौदर्यं, रसानां त्यजनं तथा ।
स्नानस्यासेवनं चैव, ताम्बूलस्य च वर्जनम् ॥

३४

असेवेच्छानिरोधस्तु, ज्ञानस्य स्मरणं तथा ।
एते हि निर्जरोपायाः, मदनस्य महारिपोः ॥

३५

धन्यास्ते वंदनीयास्ते, तैस्त्रैलोक्यं पवित्रितम् ।
यैरेष भुवनक्लेशी, काममल्लो विनिर्जितः ॥

१ होम, २ अग्नि ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३६

मातरं स्वसुतां जामिं, रागान्धो नैव पश्यति ।
पशुवद्रमते तत्र, रामाऽपि स्वसुतादिषु ॥

३७

मदनोऽस्ति महाव्याधिर्दुश्चिकित्स्यः सदा बुधैः ।
संसारवर्धनोऽत्यर्थं, दुःखोत्पादनतत्परः ॥

३८

यावद्यस्य हि कामाग्निर्हृदये प्रज्वलत्यलम् ।
आश्रयन्ति हि कर्माणि, तावत्तस्य निरन्तरम् ॥

३९

दोषाणामाकरः कामो, गुणानां च विनाशकृत् ।
पापस्य च निजो बन्धुरापदां चैव सङ्गमः ॥

४०

कामिनां कामिनीनां च, सङ्गात् कामी भवेत् पुमान् ।
देहान्तरे ततः क्रोधीः, लोभी मोही च जायते ॥

४१

पाण्डुत्वं गमितान्कचान्प्रतिहतां तारुण्यपुण्यश्रियं ।
चक्षुः क्षीणबलं कृतं श्रवणयोर्बाधिर्यमुत्पादितम् ॥
स्थानभ्रंशमवापिताश्च जरया दन्तास्थिमांसत्वचः ।
पश्यन्तोऽपि जडा हहा हृदि सदा ध्यायन्ति तां प्रेयसीम् ॥

४२

तावन्मौनी यतिर्ज्ञानी सुतपस्वी जितेन्द्रियः ।
यावन्न योषितां दृष्टि-गोचरं याति पुरुषः ॥

४३

नासौ जयी जिता येन नक्रव्यालमृगाधिपाः ।
जितं तेनैव येनेह दान्तो मारस्त्रिलोकजित् ॥

४४

प्रज्ञां विनाशयत्यादौ प्रविष्टो हृदि मन्मथः ।
दृष्टो गेहं समायाति दीपं निर्वाप्य तस्करः ॥

४५

व्याकीर्ण केशर—करालमुखा मृगेन्द्रा,
नागाश्च भूरिमदराजिविराजमानाः ।
मेधाविनश्च पुरुषाः समरेषु शूराः,
स्त्रीसन्निधौ परमकापुरुषा भवन्ति ॥

## स्त्रीगुण ।

१

यस्य भार्या शुचिर्दक्षा भर्तारमनुगामिनी ।
नित्यं मधुरवक्त्री च, सा रमा न रमा रमा ॥

२

रूपसंपन्नमग्राम्यं, प्रेमप्रायं प्रियंवदम् ।
कुलीनमनुकूलं च, कलत्रं कुत्र लभ्यते ॥

३

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
गृहं तु गृहिणीहीनं, कान्तारादतिरिच्यते ॥

४

कार्ये दासी रतौ वेश्या, भोजने जननीसमा ।
विपत्तौ बुद्धिदात्री च, सा भार्या सर्वदुर्लभा ॥

५

वश्यभावेन सुमनाः, सुव्रता सुसमाहिता ।
अनन्यचित्ता सुमुखी, भर्तुः साधर्मचारिणी ॥

६

न कार्येषु न भोगेषु, नैश्वर्ये न सुखे तथा ।
स्पृहा स्याच्च तथा भर्तुः, सा नारी सुखभागिनी ॥

७

श्वश्रूश्वशुरयोः पादौ, तोषयन्ती पतिव्रता ।
मातृपितृपरा नित्यं, या नारी सा पतिव्रता ॥

८

पतिर्हि देवो नारीणां, पतिर्बन्धुः पतिर्गतिः ।
पत्युर्गति समा नास्ति, दैवतं वा यथापतिः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



९

कार्येषु मन्त्री करणेषु दासी।
भोज्येषु माता शयनेषु रम्भा॥
धर्मानुकूला क्षमया धरित्री।
भार्या च षाड्गुण्यवतीह दुर्लभा॥

१०

यत्र नास्ति दधिमंथनघोषो, यत्र नो लघुतराः शिशवश्च
यत्र नास्ति गुणगौरवरंभा तद्गृहाणि न गृहाणि भवन्ति

११

मनसि वचसि कार्ये जागरे स्वप्नमार्गे ।
यदि मम पतिभावो राघवादन्यपुंसि ॥
तदिह दह शरीरं मामकं पावकेदं ।
सुकृतविकृतभाजां देव! लोकेषु साक्षी ॥

१२

यथाऽहं राघवादन्यं, मनसापि न चिन्तये ।
तथा मे [1]माधवी देवि, [2]विवरं दातुमर्हति ॥

१३

दरिद्रता धीरतया विराजते, कुरूपता शीलतया विराजते
कुभोजनं चोष्णतया विराजते, कुवस्त्रता शुभ्रतया विराजते

---

१ पृथ्वी, २ स्थान।

१४

भर्त्ता देवो गुरुर्भर्त्ता, धर्मतीर्थं व्रतानि च ।
तस्मात्सर्वं परित्यज्य, पतिमेकं भजेत्सती ॥

१५

कोकिलानां स्वरो रूपं, नारीरूपं पतिव्रतम् ।
विद्यारूपं कुरूपाणां, क्षमारूपं तपस्विनाम् ॥

१६

पतिव्रतायाः कुचकुम्भयुग्ममत्युग्रशार्दूलनखावलिश्च।
वीरस्य शस्त्रं कृपणस्य वित्तं, लभ्यानि चत्वारि तदन्तकाले

१७

न भार्यान्ताडयेत् क्वापि, मातृवत् पालयेत् सदा ।
न त्यजेद् घोरकष्टेऽपि, यदि साध्वी पतिव्रता ॥

१८

पैशुन्यहिंसा–विद्वेष, मदाऽहंकारधूर्तता ।
नास्तिक्यसाहसस्तेय, दम्भान्साध्वी विवर्जयेत् ॥

१९

शाश्वतोयं धर्मपथः, सद्भिराचरितः सदा ।
यन्नार्याः परिरक्षन्ति, भर्त्तारो निर्बला अपि ॥

२०

अनुकूलां विमलाङ्गीं, कुलजां कुशलां सुशीलसंपन्नाम्।
एतादृशीं सुभार्यां, पुरुषः पुण्योदयाल्लभते ॥

२१

आसने भोजने दाने सम्माने प्रियभाषणे ।
दक्षया सर्वदा भाव्यं, भार्यया गृहमुख्यया ॥

२२

सतीनां पादरजसा, सद्यः पूता वसुन्धरा ।
पतिव्रतां नमस्कृत्य, मुच्यते पातकान्नरः ॥

२३

भर्त्ता हि परमं नार्या, भूषणं भूषणैर्विना ।
एषा विरहिता तेन, शोभमाना न शोभते ॥

२४

सुस्वभावा सुवचना सुव्रता सुखदर्शना ।
अनन्यचित्ता सुमुखी, भर्तुः सा धर्मचारिणी ॥

२५

सा भार्या या गृहे दक्षा, सा भार्या या प्रजावती।
सा भार्या या पतिप्राणा, सा भार्या या पतिव्रता ॥

२६

छायेवानुगता स्वच्छा, सखीव हितकर्मसु ।
दासीवादिष्टकार्येषु, भार्या भर्त्तुः सदा भवेत् ॥

२७

कार्यार्थे निर्गतं चापि, भर्त्तारं गृहमागतम् ।
आसनेनोपसंयोज्य, पूजयेत्सुसमाहिता ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२८

न च भार्यासमं किंचिद्विद्यते भिषजां मतम् ।
औषधं सर्वदुःखेषु, सत्यमेतत् ब्रवीमि ते ॥

२९

नास्ति भार्यासमो बन्धुर्नास्ति भार्यासमा गतिः ।
नास्ति भार्यासमो लोके, सहायो धर्मसंग्रहे ॥

३०

अर्द्धं भार्या मनुष्यस्य, भार्या श्रेष्ठतमः सखा ।
असहायस्य लोकेऽस्मिन्, लोकयात्रासहायिनी ॥

३१

कान्तारेष्वपि विश्रामो, जनस्य गृहिणी मता ।
यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः ॥

३२

सा क्षौमवसना हृष्टा, नित्यं व्रतपरायणा ।
जुहोति स तदग्निं या–मन्त्रवत्कृतमङ्गला ॥

३३

पंगुमन्धं च कुब्जं च, कुष्ठाङ्गं व्याधिपीडितं ।
आपत्सु च गतं नाथं, न त्यजेत्सा महासती ॥

३४

सखायः [1]प्रविविक्तेषु, भवन्त्येताः प्रियंवदाः ।
पितरो धर्मकार्येषु, [2]भवन्त्यार्त्तस्य मातरः ॥

३५

उदेति यदि वारुण्यां, भानुश्चांगारमुक् शशी ।
तथापि सा सती शीलं, प्राणान्तेऽपि न लुम्पति ॥

## स्त्री–स्वभाव–निंदा ।

१

अनृतं साहसं माया, मूर्खत्वमतिलोभिता ।
अशौचं निर्दयत्वं च, स्त्रीणां दोषाः स्वभावजाः ॥

२

जल्पन्ति [3]सार्धमन्येन, पश्यन्त्यन्यं सविभ्रमम् ।
हृदये चिन्तयन्त्यन्यं, प्रियः को नाम योषिताम् ॥

३

स्त्रीणां द्विगुण आहारो, लज्जा चापि चतुर्गुणा ।
साहसः षड्गुणश्चैव, कामश्चाष्टगुणः स्मृतः ॥

४

अन्तःक्रूराः सुवादिन्य, अगाधहृदयाः स्त्रियः ।
अन्तर्विषा बहिः सौम्या, भक्ष्या विषकृता इव ॥

१ एकान्त में, २ दुःख में, ३ सह ।

५

दर्शनात् ग्रसते चित्तं, स्पर्शनात् ग्रसते धनम् ।
संभोगात् हरते वीर्यं, नारी प्रत्यक्षराक्षसी ॥

६

अन्तर्विषमया ह्येता, बहिश्चैव मनोरमाः ।
गुञ्जाफलसमाकारा, योषितः केन निर्मिताः ॥

७

ताडिता अपि दण्डेन, शस्त्रैरपि विखण्डिताः ।
न वशं योषितो यान्ति, न दानैर्न च संस्तवैः ॥

८

एताः स्वार्थपरा नार्यः, केवलं स्वसुखे रताः ।
न तासां वल्लभः कोऽपि सुतोऽपि स्वसुखं विना ॥

९

न दानेन न मानेन, नार्जवेन न सेवया ।
न शस्त्रेण न शास्त्रेण, सर्वथा विषमाः स्त्रियः ॥

१०

न स्त्रीणामप्रियः कश्चित्प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये, प्रार्थयन्ति नवं नवम् ॥

११

यस्य स्त्री तस्य भोगेच्छा, निस्स्त्रीकस्य क्व भोगभूः ।
स्त्रियं त्यक्त्वा जगत्त्यक्तं, जगत्यक्त्वा सुखी भवेत् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१२

नयनविकारैरन्यं वचनैरन्यं विचेष्टितैरन्यम् ।
रमयति सुरतेनान्यं, स्त्री बहुरूपा निजा कस्य ॥

१३

स्त्रियो हि मूलं निधनस्य पुंसः ।
स्त्रियो हि मूलं व्यसनस्य पुंसः ॥
स्त्रियो हि मूलं नरकस्य पुंसः ।
स्त्रियो हि मूलं कलहस्य पुंसः ॥

१४

संमोहयन्ति मदयन्ति विडम्बयन्ति ।
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ॥
एताः प्रविश्य सदयं हृदयं नराणां ।
किं नाम वामनयना न समाचरन्ति ॥

१५

भर्त्ता यद्यपि नीतिशास्त्रनिपुणो विद्वान्कुलीनो युवा ।
दाता कर्णसमः प्रसिद्धविभवः शृङ्गारदीक्षागुरुः ॥
स्वप्राणाधिककल्पिता स्ववनिता स्नेहेन संलापिता ।
तं कान्तं प्रविहाय सैव युवती जारं पतिं वाञ्छति ॥

१६

प्रा:पाकं न करोषि पापिनि कथं पापी त्वदीयः पिता ।
रण्डे जल्पसि किं तवैव जननी रण्डा त्वदीया स्वसा ॥
निर्गच्छ त्वरितं गृहात् बहिरितो नेदं त्वदीयं गृहम् ।
हा हा ! नाथ ममाद्य देहि मरणं जारस्य भाग्योदयः ॥

१७

नूनं हि ते कविवरा विपरीतबोधाः ।
ये नित्यमाहुरबला इति कामिनीस्ताः ॥
याभिर्विलोलतरतारक-दृष्टिपातैः ।
शक्रादयोऽपि विजितास्त्वबलाः कथं ताः ॥

१८

ललाटे कस्तूरीं तिलकमबलाः कज्जलरुचिं ।
दृशोः कर्णद्वंद्वे विमलमणि-ताटङ्कयुगलम् ॥
गले मुक्तामालां शुचिवसनमङ्गे च सततं ।
वशीकर्तुं विश्वं दधति खलु वाह्योपकरणम् ॥

१९

रे रे घरट्ट मा रोदीः, कं कं न भ्रामयन्त्यमूः ।
कटाक्षवीक्षणादेव, कराकृष्टस्य का कथा ॥

२०

मद्यपाः किं न जल्पन्ति, किं न भक्षन्ति वायसाः ।
कवयः किं न पश्यन्ति, किं न कुर्वन्ति योषितः ॥

२१

कुदेशं च कुवृत्तिं च, कुभार्यां कुनदीं तथा ।
कुद्रव्यं च कुभोज्यं च, वर्जयेत्तु विचक्षणः ॥

२२

माता यस्य गृहे नास्ति, भार्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं, यथारण्यं तथा गृहम् ॥

२३

असंतुष्टा द्विजा नष्टाः, संतुष्टश्च महीपतिः ।
सलज्जा गणिका नष्टा, निर्लज्जाश्च कुलस्त्रियः ॥

२४

पानं दुर्जनसंसर्गः, पत्या च विरहोऽटनम् ।
स्वप्नमन्यगृहे वासो, नारीणां दूषणानि षट् ॥

२५

निर्भूमिर्विषकंदली गतदरी व्याघ्री निराह्वो महा ।
व्याधिर्मृत्युरकारणश्च ललना नष्टाभ्रवज्राशनिः ॥
बन्धुस्नेह-विघात-साहस-मृषावादादिसंतापभूः ।
प्रत्यक्षापि च राक्षसीति विरुदैः ख्यातागमे त्यज्यताम् ॥

२६

चर्मास्थिमज्जांत्रवसास्त्रमांस-
मेध्याद्यशुच्यस्थिरपुद्गलानाम् ॥
स्त्रीदेहपिंडाकृतिसंस्थितेषु ।
स्कंधेषु किं पश्यसि रम्यमात्मन् ॥


३०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२७

सद्यो बुद्धिहरा तुंडी, सद्यः प्रज्ञाकरी वचा ।
सद्यः शक्तिहरा नारी, सद्यः शक्तिकरं पयः ॥

२८

स्तनौ मांसग्रन्थी कनक-कलशावित्युपमितौ ।
मुखं श्लेष्मागारं तदपि च शशांकेन तुलितम् ॥
स्रवन्मूत्रक्लिन्नं करिवरशिरःस्पर्धि जघनं ।
मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥

२९

मांसं मृगाणां दशनौ गजानां ।
मृगद्विषां चर्म फलं द्रुमाणाम् ॥
स्त्रीणां सुरूपं च नृणां हिरण्य-
मेते गुणा वैरकरा भवन्ति ॥

३०

अनुचितकार्यारंभः, स्वजनविरोधो बलीयसा स्पर्धा ।
प्रमदाजनविश्वासो, मृत्युद्वाराणि चत्वारि ॥

३१

अपक्के तु घटे नीरं, चालिन्या सूक्ष्मपिष्टकं ।
स्त्रीणां च हृदये वार्ता, न तिष्ठति कदापि हि ॥

३२

लोकेषु निर्धनो दुःखी, ऋणग्रस्तस्ततोऽधिकम् ।
ताभ्यां रोगयुतो दुःखी, तेभ्यो दुःखी कुभार्यकः ॥

३३

यस्य भार्या विरूपाक्षी, परमन्दिरकाङ्क्षिणी ।
कुलघ्ना कुशीला च, दूरतः परिवर्जयेत् ॥

३४

अत्यासन्ना विनाशाय, दूरस्था न फलप्रदाः ।
सेव्यन्तां मध्यभावेन, राजा वह्निर्गुरुः स्त्रियः ॥

३५

अग्निरापः स्त्रियो मूर्खः, सर्पो राजकुलानि च ।
नित्यं यत्नेन सेव्यानि, सद्यः प्राणहराणि षट् ॥

३६

विलीयते घृतं यद्वदग्नेः संसर्गतस्तथा ।
नारीसंसर्गतः पुंसो, धैर्यं नश्यति सर्वथा ॥

३७

स्त्रियो हि निन्द्यतां लोके, स्त्रियः प्रीतिविनाशिकाः ।
पापबीजं कलेर्मूलं, धर्मस्य नाशिकाः स्त्रियः ॥

३८

स्त्रीणां वाक्यं तु ये मूढा, मानयित्वा परस्परम् ।
विरोधं चात्र कुर्वन्ति, ते नरा लोकनिन्दिताः ॥

३९

कुदेहां विगतस्नेहां लज्जाशीलकुलोज्झिताम् ।
अतिप्रचण्डां दुस्तुण्डां गृहिणीं परिवर्जयेत् ॥

४०

के द्रुमास्ते क्व वा सन्ति सन्ति केन प्ररोपिताः ।
नाथ ! मत्कङ्कणान्यस्तं येषां मुक्ताफलं फलम् ॥

४१

सम्यक्परिहृता येन कामिनी गजगामिनी ।
किं करिष्यति रुष्टोऽपि तस्य वीरवरः स्मरः ॥

४२

क्व कफार्तं मुखं नार्याः क्व पीयूषनिधिः शशी ।
आमनन्ति तयोरैक्यं कामिनो मन्दबुद्धयः ॥

## स्वभाव-वर्णनम् ।

१

यः स्वभावो हि यस्यास्ते, स नित्यं दुरतिक्रमः ।
श्वा यदि क्रियते राजा, तत्किं नाश्नात्युपानहम् ॥

२

न धर्मशास्त्रं पठतीति कारणं,
न चापि वेदाध्ययनं दुरात्मनः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वभाव एवात्र तथातिरिच्यते,
यथा प्रकृत्या मधुरं गवां पयः ॥

३

काकः पद्मवने रतिं न कुरुते हंसो न कूपोदके ।
मूर्खः पण्डितसंगमे न रमते दासो न सिंहासने ॥
कुस्त्री सज्जनसंगमे न रमते नीचं जनं सेवते ।
या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ॥

४

पिण्डे पिण्डे मतिर्भिन्ना, कुण्डे कुण्डे नवं पयः ।
जातौ जातौ नवाचारा, नवा वाणी मुखे मुखे ॥

५

मधुना सिञ्चयेन्निम्बं, निम्बः किं मधुरायते ।
जातिस्वभाव-दोषोऽयं, कटुकत्वं न मुञ्चति ॥

६

मूर्खाणां पण्डिता द्वेष्या, निर्धनानां महाधनाः ।
व्रतिनः पापशीलानामसतीनां कुलस्त्रियः ॥

७

काके शौचं द्यूतकारे च सत्यं,
सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः ।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता,
राजा मित्रं केन दृष्टं श्रुतं वा ॥

८

मर्कटस्य सुरापानं, तत्र वृश्चिकदंशनम् ।
तन्मध्ये भूतसंचारो, यद्वा तद्वा भविष्यति ॥

९

इन्दुं निन्दति तस्करो गृहपतिं जारो सुशीलं खलः ।
साध्वीमप्यसती कुलीनमकुलो जह्याज्जरन्तं युवा ॥
विद्यावन्तमनक्षरो धनपतिं नीचश्च रूपोज्ज्वलम् ।
वैरूप्येण हतः प्रबुद्धमबुधो कृष्टं निकृष्टो जनः ॥

१०

काकस्य गात्रं यदि कांचनस्य,
माणिक्यरत्नं यदि चञ्चुदेशे ।
एकैकपक्षे ग्रथितं मणीनां,
तथापि काको न तु राजहंसः ॥

११

नैर्मल्यं वपुषस्तवास्ति वसतिः पद्माकरे जायते ।
मन्दं याहि मनोरमां वद गिरं मौनं च संपादय ॥
धन्यस्त्वं बक राजहंसपदवीं प्राप्तोसि किं तैर्गुणै-
र्नीरक्षीरविभागकर्मनिपुणा शक्तिः कथं लभ्यते ॥

१२

नलिकागतमपि कुटिलं, न भवति सरलं शुनः पुच्छम् ।
तद्वत्खलजनहृदयं, बोधितमपि नैव याति माधुर्यम् ॥

१३

अस्ति यद्यपि सर्वत्र, नीरं नीरजमण्डितम् ।
रमते न मरालस्य, मानसं मानसं विना ॥

१४

भवत्येकस्थले जन्म, गन्धस्तेषां पृथक् पृथक् ।
उत्पलस्य मृणालस्य, मत्स्यस्य कुमुदस्य च ॥

१५

किं कुलेन विशालेन, शीलमेवात्र कारणम् ।
कृमयः किं न जायन्ते, कुसुमेषु सुगन्धिषु ॥

१६

न दुर्जनः साधुदशामुपैति, बहुप्रकारैरपि शिक्ष्यमाणः ।
आमूलसिक्तः पयसा घृतेन, न निम्बवृक्षो मधुरत्वमेति ॥

१७

प्रकृत्यैव विभिद्यन्ते, गुणा एकस्य वस्तुनः ।
वृन्ताकः श्लेष्मदः कस्मै, कस्मैचिद्वातरोगकृत् ॥

## वीर-स्वभावः ।

१

लब्ध्वापि संपदो दीनो, हीनत्वं नैव मुञ्चति ।
शिरश्छेदेऽपि वीरस्तु, धीरत्वं नैव मुञ्चति ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२

हस्ती स्थूलतनुः स चांकुशवशः किं हस्तिमात्रोऽङ्कुशो ।
वज्रेणाभिहताः पतन्ति गिरयः किं शैलमात्रःपविः ॥
दीपे प्रज्वलिते विनश्यति तमः किं दीपमात्रं तमः ।
तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्ययः ॥

३

यत्रास्ति लक्ष्मीर्विनयो न तत्र ।
अभ्यागतो यत्र न तत्र लक्ष्मीः ॥
उभौ च तौ यत्र न तत्र विद्या ।
नैकत्र सर्वो गुणसन्निपातः ॥

४

कोदारेण विदारिता वसुमती पश्चात्खरारोहणम् ।
तस्यापिष्टकुलालपादहननं दंडेन चक्रभ्रमः ॥
रज्वा छेदन–ताप–ताडनमथो ह्येतद्विषोढं मया ।
कामिन्याः करटंकणं बहुकृतं ह्येतद्धि दुःखं महत् ॥

५

स्थानमुत्सृज्य गच्छन्ति, सिंहाः सत्पुरुषा गजाः ।
तत्रैव निधनं यान्ति, काकाः कापुरुषा मृगाः ॥

६

नाभिषेको न संस्कारः, सिंहस्य क्रियते मृगैः ।
विक्रमार्जितराज्यस्य, स्वयमेव मृगेन्द्रता ॥

७

आपदि मित्रपरीक्षा, शूरपरीक्षा रणाङ्गणे भवति ।
विनये वंशपरीक्षा, स्त्रियः परीक्षा तु निर्धने पुंसि ॥

८

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥

९

चलन्ति गिरयः कामं, युगान्तपवनाहताः ।
कृच्छ्रेऽपि न चलत्येव, धीराणां निश्चलं मनः ॥

१०

विदारयति यत्कर्म, तपसा च विराजते ।
तपो वीर्येण युक्तश्च तस्माद्वीर इति स्मृतः ॥

## गुणः ।

१

गुणाः कुर्वन्ति दूतत्वं, दूरेऽपि वसतां सताम् ।
केतकीगन्धमाघ्राय, स्वयं गच्छन्ति षट्पदाः ॥

२

यदि सन्ति गुणाः पुंसां, विकसन्त्येव ते स्वयम् ।
न हि कस्तूरिकामोदः, शपथेन प्रतीयते ॥

३

गुणवज्जनसंसर्गाद्याति, स्वल्पोऽपि गौरवम् ।
पुष्पमालाप्रसङ्गेन, सूत्रं शिरसि धार्यते ॥

४

शरीरस्य गुणानाञ्च, दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि, कल्पान्त–स्थायिनो गुणाः ॥

५

गुणैर्गौरवमायाति, नोच्चैरासनमास्थितः ।
प्रासादशिखरस्थोऽपि, काकः किं गरुडायते ॥

६

गुणिनोऽपि हि सीदन्ति, गुणग्राही न चेदिह ।
सगुणः पूर्ण–कुम्भोपि, कूप एव निमज्जति ॥

७

गुणाः सर्वत्र पूज्यन्ते, पितृवंशो निरर्थकः ।
वासुदेवं नमस्यन्ति, वसुदेवं न मानवाः ॥

८

गुणानर्चन्ति जन्तूनां, न जातिं केवलां क्वचित् ।
स्फाटिकं भाजनं भग्नं, काकिण्याऽपि न गृह्यते ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

नागुणी गुणिनं वेत्ति, गुणी गुणिषु मत्सरी ।
गुणी च गुणरागी च, विरलः सरलो जनः ॥

१०

परैः प्रोक्ता गुणा यस्य, निर्गुणोऽपि गुणी भवेत् ।
इन्द्रोऽपि लघुतां याति, स्वयं प्रख्यापितैर्गुणैः ॥

११

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः ।
मधोर्गुणं वेत्ति पिको न वायसः,
करी च सिंहस्य बलं न मूषकः ॥

१२

बालादपि ग्रहीतव्यं, युक्तमुक्तं मनीषिभिः ।
रवेरविषये किं न, प्रदीपस्य प्रकाशनम् ॥

१३

युक्तियुक्तमुपादेयं, वचनं बालकादपि ।
विदुषाऽपि सदा ग्राह्यं, वृद्धादपि न दुर्वचः ॥

१४

 अणुभ्यश्च बृहद्भ्यश्च, शास्त्रेभ्यः कुशलो नरः ।
सर्वतः सारमादद्यात्, पुष्पेभ्य इव षट्पदः ॥

१५

गुणैः स्थानच्युतस्याऽपि, जायते महिमा महान् ।
अपि भ्रष्टं तरोः पुष्पं, जनैः शिरसि धार्यते ॥

१६

विद्योत्तमा सदा ग्राह्या, नीचगापि महात्मभिः ।
अमेध्यपतितं स्वर्णं, न त्यजन्ति यथा बुधाः ॥

१७

विरलाः पण्डिता लोके विरलाश्च परीक्षकाः ।
विरला दुःखभेत्तारो, त एव जगदुत्तमाः ॥

## सत्संगः ।

१

संसारकटुवृक्षस्य, द्वे फले ह्यमृतोपमे ॥
सुभाषितरसास्वादः, संगतिः सुजनैर्जनैः ॥

२

महाजनस्य संसर्गः, कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं वारि, धत्ते मुक्ताफलश्रियम् ॥

३

चन्दनं शीतलं लोके, चंदनादपि चन्द्रमाः ।
चन्द्रचन्दनयोर्मध्ये, शीतला साधुसंगतिः ॥

४

साधूनां दर्शनं पुण्यं, तीर्थभूता हि साधवः ।
कालेन फलते तीर्थं, सद्यः साधुसमागमः ॥

५

काचः काञ्चनसंसर्गा-द्धत्ते मारकतीं द्युतिम् ।
तथा सत्संनिधानेन, मूर्खो याति प्रवीणताम् ॥

६

यदि सत्संगनिरतो, भविष्यसि भविष्यसि ।
अथ दुर्जनसंसर्गे, पतिष्यसि पतिष्यसि ॥

७

जाड्यं धियो हरति सिंचति वाचि सत्यं ।
मानोन्नतिं दिशति पापमपाकरोति ॥
चेतः प्रसादयति दिक्षु तनोति कीर्तिं ।
सत्संगतिः कथय किं न करोति पुंसाम् ॥

८

को लाभो ? गुणिसङ्गमः, किमसुखः ? प्राज्ञेतरैः संगतिः ।
का हानिः ? समयच्युतिर्निपुणता का ? धर्मतत्त्वे रतिः ॥
कः शूरो ? विजितेन्द्रियः प्रियतमा काऽनुव्रता किं धनं- 
विद्या किं सुख ? मप्रवासगमनं, राज्यं किमाज्ञाफलम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

मलयाचलगन्धेन, त्विन्धनश्चन्दनायते ।
तथा सज्जनसङ्गेन, दुर्जनः सज्जनायते ॥

१०

सम्भाषा दर्शनं स्पर्शः, कीर्तनं स्मरणं तथा ।
पावनानि किलैतानि, साधूनामिति शुश्रुम ॥

११

शून्यमापूर्णतामेति, मृत्युरप्यमृतायते ।
आपत्संपदिवाभाति, विद्वज्जनसमागमात् ॥

१२

कान्तारभूमिरुहमौलिनिवासशीलाः,
प्रायः पलायनपरा जनवीक्षणेन ।
कूजन्ति तेऽपि हि शुकाः खलु रामनाम,
सङ्गः स्वभावपरिवर्तविधौ निदानम् ॥

१३

संतप्तायसि संस्थितस्य पयसो, नामापि न श्रूयते ।
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ॥
स्वात्यां सागरशुक्तिसंपुटगतं, तज्जायते मौक्तिकं ।
प्रायेणाऽधममध्यमोत्तमगुणः संसर्गतो जायते ॥

१४

संतोषः साधुसङ्गश्च, विचारोऽथ शमस्तथा ।
एत एव भवाम्भोधा–वुपायास्तरणे नृणाम् ॥

१५

त्यज दुर्जनसंसर्गं भज साधुसमागमम् ।
कुरु पुण्यमहोरात्रं, स्मर नित्यमनित्यताम् ॥

१६

पद्मानि राजहंसाश्च, निर्ग्रन्थाश्च तपोधनाः ।
यं देशमुपसर्पन्ति, तत्र देशे शिवं भवेत् ॥

१७

मोक्षद्वारप्रतीहाराश्चत्वारः परिकीर्तिताः ।
शमो विवेकः सन्तोषश्चतुर्थः साधुसङ्गमः ॥

१८

कीटो भ्रमरयोगेन, भ्रमरो भवति ध्रुवम् ।
मानवः शिवयोगेन, शिवो भवति निश्चितम् ॥

१९

तत्त्वं चिन्तय सततं चित्ते, परिहर चिन्तां नश्वरवित्ते ।
क्षणमिह सज्जनसंगतिरेका, भवति भवार्णवतरणे नौका

२०

नलिनीदलगतजलवत्तरलं, तद्वज्जीवनमतिशयचपलम् ।
क्षणमपि सज्जनसङ्गतिरेका, भवति भवार्णवतरणे नौका

२१

हरति हृदयबन्धं कर्मपाशार्दितानां,
वितरति पदमुच्चैरल्पजल्पैकभाजाम् ।
जननमरणकर्मश्रान्तविश्रान्तिहेतु–
स्त्रिजगति मनुजानां दुर्लभः साधुसंगः ॥

२२

दूरीकरोति कुमतिं विमलीकरोति,
चेतश्चिरन्तनमघं चुलुकीकरोति ।
भूतेषु किं च करुणां बहुलीकरोति,
सङ्गः सतां किमु न मङ्गलमातनोति ॥

२३

सद्भिरासीत सततं, सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्वादं सुमैत्रीं च, नासद्भिः किञ्चिदाचरेत् ॥

२४

पूर्वपुण्यवशतोऽखिलं हि, तल्लभ्यते यदि सुकर्मपाकतः ।
दुर्लभस्तदपि कल्पवृक्षवद्योग्यसंयमिगुरोः समागमः ॥

२५

पश्य सत्सङ्गमाहात्म्यं, स्पर्शपाषाणयोगतः ।
लोहञ्च जायते स्वर्णं, योगात्काचो मणीयते ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२६

शिरसा सुमनःसंगाद्धार्यन्ते तंतवोपि हि ।
तेपि पादेन मृद्यंते, पटेऽपि मलसङ्गताः ॥

२७

आकृतौ हि गुणा नूनं, सत्यीभूतमिदं वचः ।
यस्यैव दर्शनेनापि, नेत्रं च सफलीभवेत् ॥

२८

यती व्रती चापि पतिव्रताश्च, वीरश्च शूराश्च दयापराश्च ।
त्यागी च भोगी च बहुश्रुतश्च, सुसंगमात्रेण दहन्ति पापम् ।

२९

नाहं काको महाराज ?, हंसोऽहं विमले जले ।
नीचकाकप्रसंगेन, मृत्युरेव न संशयः ॥

३०

कुसंगसंगदोषेण, साधवो यान्ति विक्रियां ।
एकरात्रप्रसंगेन, काष्टघण्टाविडंबना ॥

३१

महानुभावसंसर्गः, कस्य नोन्नतिकारकः ।
रथ्याम्बु जाह्नवीसंगात्, त्रिदशैरपि वन्द्यते ॥

३२

२५ असतां संगपङ्केन, यन्मनो मलिनीकृतं ।
तन्मेऽद्य निर्मलीभूतं, साधुसम्बन्धवारिणा ॥

पूर्वपुण्यतरोरद्य, फलं प्राप्तं मयानघं ।
संगेनासंगचित्तानां, साधूनां गुणवारिणा ॥

## असत्संगतिः ।

१

हीनसेवा न कर्तव्या, कर्तव्यो महदाश्रयः ।
पयोऽपि शौण्डिकीहस्ते, वारुणीत्यभिधीयते ॥

२

न स्थातव्यं न गन्तव्यं, क्षणमप्यधमैः सह ।
पयोऽपि शौण्डिकीहस्ते, मदिरां मन्यते जनः ॥

३

अहो दुर्जनसंसर्गान्मानहानिः पदे पदे ।
पावको लोहसङ्गेन, मुद्गरैरभिहन्यते ॥

४

असतां सङ्गदोषेण, साधवो यान्ति विक्रियाम् ।
दुर्योधनप्रसङ्गेन भीष्मो गोहरणे गतः ॥

५

बुद्धिश्च हीयते पुंसां, नीचैः सह समागमात् ।
मध्यमैर्मध्यतां याति, श्रेष्ठतां याति चोत्तमैः ॥

६

अगुरप्यसतां सङ्गः, सद्गुणं हन्ति विस्तृतम् ।
गुणो रूपान्तरं याति, तक्रयोगाद्यथा पयः ॥

७

असत्सङ्गाद् गुणज्ञोऽपि, विषयासक्तमानसः ।
अकस्मात्प्रलयं याति, गीतरक्तो यथा मृगः ॥

८

रे जीव ! सत्संगमवाप्नुहि त्व-
मसत्प्रसङ्गं त्वरया विहाय ।
धन्योऽपि निन्दां लभते कुसङ्गात्
सिन्दूरविन्दुर्विधवाललाटे ॥

## सज्जनस्वभावः ।

१

संपदो महतामेव, महतामेव चापदः ।
वर्धते क्षीयते चन्द्रो, न तु तारागणः क्वचित् ॥

२

गङ्गा पापं शशी तापं, दैन्यं कल्पतरुस्तथा ।
पापं तापं च दैन्यं च, हन्ति मुनिमहाशयः ॥ २६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३

महतां प्रार्थनेनैव, विपत्तिरपि शोभते ।
दन्तभङ्गो हि नागानां, श्लाघ्यो गिरिविदारणे ॥

४

उदये सविता रक्तो, रक्तश्चास्तमये तथा ।
संपत्तौ च विपत्तौ च, महतामेकरूपता ॥

५

नारिकेलसमाकारा, दृश्यन्तेऽपि हि सज्जनाः ।
अन्ये बदरिकाकारा, बहिरेव मनोहराः ॥

६

परोपदेशे पाण्डित्यं, सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयमनुष्ठानं, कस्यचित्तु महात्मनः ॥

७

संपत्सु महतां चित्तं, भवत्युत्पलकोमलम् ।
आपत्सु च महाशैल-शिलासंघातकर्कशम् ॥

८

श्लोकस्तु श्लोकतां याति, यत्र तिष्ठन्ति साधवः ।
लकारो लुप्यते तत्र, यत्र तिष्ठन्त्यसाधवः ॥

९

यथा चित्तं तथा वाचो, यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च, साधूनामेकरूपता ॥

१०

स्वभावं न जहात्येव, साधुरापद्गतोऽपि सन् ।
कर्पूरः पावकस्पृष्टः, सौरभं लभतेतराम् ॥

११

वित्ते त्यागः क्षमा शक्तौ, दुःखे दैन्यविहीनता ।
निर्दम्भता सदाचारे, स्वभावोऽयं महात्मनाम् ॥

१२

संपदि यस्य न हर्षो, विपदि विषादो रणे च धीरत्वम् ।
तं भुवनत्रयतिलकं, जनयति जननी सुतं विरलम् ॥

१३

मूकः परापवादे, परदारनिरीक्षणेऽप्यन्धः ।
पङ्गुः परधनहरणे, स जयति लोकत्रयं पुरुषः ॥

१४

गुणिनः समीपवर्ती, पूज्यो लोकस्य गुणविहीनोऽपि ।
विमलेक्षणप्रसङ्गादञ्जनमाप्नोति काणाक्षि ॥

१५

वनेऽपि सिंहा मृगमांसभक्षिणो,
क्षुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूता,
न नीचकर्माणि समाचरन्ति ॥

१६

पिबन्ति नद्यः स्वयमेव नाम्भः,
स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः,
परोपकाराय सतां विभूतयः ॥

१७

रत्नाकरः किं कुरुते स्वरत्नै-
र्विन्ध्याचलः किं करिभिः करोति ।
श्रीखण्डखण्डैर्मलयाचलः किं,
परोपकाराय सतां विभूतयः ॥

१८

मनसि वचसि काये, पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ॥
परगुणपरमाणुः पर्वतीकृत्य नित्यं ।
निजहृदि विकसन्तः, सन्ति सन्तः कियन्तः ॥

१९

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं ।
छिन्नं छिन्नं पुनरपि पुनश्चेक्षुकाण्डं रसालं ॥
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तिवर्णं ।
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२०

वाञ्छा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता ।
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ॥
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले-
ष्वेते येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ।

२१

दृश्यन्ते भुवि भूरि निम्बतरवः कुत्रापि ते चन्दनाः ।
पाषाणैः परिपूरिता वसुमती वज्रो मणिर्दुर्लभः ॥
श्रूयन्ते करटारवाश्च सततं चैत्रे कुहू कूजितं ।
तन्मन्ये खलसंकुलं जगदिदं द्वित्राः क्षितौ सज्जनाः ॥

२२

धर्मे तत्परता मुखे मधुरता दाने समुत्साहिता ।
मित्रेऽवञ्चकता गुरौ विनयिता चित्तेऽपि गम्भीरता ॥
आचारे शुचिता गुणे रसिकता शास्त्रेति विज्ञानिता ।
रूपे सुंदरता हरौ भजनिता सत्स्वेव संदृश्यते ॥

२३

गर्वं नोद्वहते न निन्दति परान्नो भाषते निष्ठुरं ।
प्रोक्तं केनचिदप्रियं च सहते क्रोधं च नालम्बते ॥
श्रुत्वा काव्यमलक्षणं परकृतं संतिष्ठते मूकव-
द्दोषांश्छादयते स्वयं न कुरुते ह्येतत्सतां लक्षणम् ॥

२४

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम् ।
अयोग्यः पुरुषो नास्ति, योजकस्तत्र दुर्लभः ॥

२५

गुणिनां निर्गुणानां च, दृश्यते महदन्तरम् ।
हारः कण्ठगतः स्त्रीणां, नूपुराणि च पादयोः ॥

२६

विपद्यपि गताः सन्तः, पापकर्म न कुर्वते ।
हंसः कुकुंटवत् कीटा-नत्ति किं क्षुधितोऽप्यलम् ॥

२७

स्वादुस्वादाऽनभिज्ञश्चेद्-द्राक्षासु [1]करभो मुखम् ।
वक्रीकुर्यात् ततस्तासां, माधुर्यं क्वापि किं गतम् ॥

२८

गुणैर्गौरवमायाति, नोच्चैरासनमास्थितः ।
प्रासादशिखरारूढः, काकः किं गरुडायते ॥

२९

षट्पदः पुष्पमध्यस्थो, यथा सारं समुद्धरेत् ।
तथा सर्वेषु शास्त्रेषु, सारं गृह्णन्ति पण्डिताः ॥

१ ऊंट ।

३०

मूलं भुजंगैः शिखरं [1]प्लवङ्गैः,
शाखा विहंगैः कुसुमानि भृङ्गैः ।
नास्त्येव तच्चन्दनपादपस्य,
यन्नाश्रितं सत्त्वभरैः समन्तात् ॥

३१

यद्यपि दिशि दिशि तरवः, परिमलबहुलाश्च पारिजाताद्याः
तदपि रसालोप्येकः, कोकिलहृदये सदा वसति ॥

३२

प्रभुर्विवेकी धनवांश्च दाता, विद्वान्विरागी प्रमदा सुशीला
तुरंगमः शस्त्रनिपातधीरो, भूमण्डलस्याभरणानि पञ्च

३३

निर्गुणेष्वपि सत्त्वेषु, दयां कुर्वन्ति साधवः ।
नहि संहरते ज्योत्स्नां, चन्द्रश्चाण्डालवेश्मनि ॥

३४

सज्जना एव साधूनां, प्रथयन्ति गुणोत्करम् ।
पुष्पाणां सौरभं प्रायस्तनुते दिक्षु मारुतम् ॥

३५

रक्तत्वं कमलानां सत्पुरुषाणां परोपकारित्वम् ।
असतां च निर्दयत्वं, स्वभावसिद्धं त्रिषु त्रितयम् ॥

१ कपि ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३६

विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतज्ज्ञानाय दानाय च रक्षणाय

३७

विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

३८

छायामन्यस्य कुर्वन्ति, तिष्ठंति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥

३९

सेवितव्यो महावृक्षः, फलच्छायासमन्वितः।
यदि दैवात्फलं नास्ति, छाया केन निवार्यते ॥

४०

नीरसान्यपि रोचन्ते, कार्पासस्य फलानि मे।
येषां गुणमयं जन्म, परेषां गुह्यगुप्तये ॥

४१

१६ अधः करोषि यद्रत्नं, मूर्ध्ना धारयसे तृणम्।
दोषस्तवैव जलधे, रत्नं रत्नं तृणान्तृणम् ॥

४२

प्रभूतवयसः पुंसो, धियः पाकः प्रवर्तते।
जीर्णस्य चन्दनतरोरामोद उपजायते ॥

४३

चोद्यमानोऽपि पापेषु, शुद्धात्मा न प्रवर्तते।
वार्यमाणोऽपि पापेभ्यः, पापात्मा न निवर्तते ॥

४४

प्रातर्द्यूतप्रसङ्गेन [भारत] मध्याह्ने स्त्रीप्रसंगतः [रामायण]
रात्रौ चोरप्रसङ्गेन [भागवत] कालो गच्छति धीमताम्।

४५

माने तपसि शौर्ये वा, विज्ञाने विनये नये।
विस्मयो नहि कर्तव्यो, नानारत्ना वसुन्धरा ॥

४६

वार्ता च कौतुकवती विमला च विद्या,
लोकोत्तरः परिमलश्च कुरंगनाभेः।
तैलस्य विन्दुरिव वारिणि दुर्निवार-
मेतत्त्रयं प्रसरति स्वयमेव लोके ॥

# दुर्जनः।

१

मूर्खशिष्योपदेशेन, दुष्टस्त्रीभरणेन च।
असतां संप्रयोगेन, पण्डितोप्यवसीदति ॥

२

दुर्जनं प्रथमं वन्दे, सज्जनं तदनन्तरम्।
मुखप्रक्षालनात्पूर्वं, गुदप्रक्षालनं यथा ॥

३

सर्पदुर्जनयोर्मध्ये, वरं सर्पो न दुर्जनः।
सर्पो दशति कालेन, दुर्जनस्तु पदे पदे ॥

४

खलो न साधुतां याति, सद्भिः संबोधितोऽपि सन्।
सरित्पूरप्रपूर्णोपि, क्षारो न मधुरायते ॥

५

उपकारोपि नीचानामपकारो हि जायते।
पयःपानं भुजङ्गानां, केवलं विषवर्द्धनम् ॥

६

दुर्जनः परिहर्तव्यो, विद्ययाऽलंकृतोपि सन्। २१
मणिना भूषितः सर्पः, किमसौ न भयङ्करः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

७

स्पृशन्नपि गजो हन्ति, जिघ्रन्नपि भुजङ्गमः ।
हसन्नपि नृपो हन्ति, मानयन्नपि दुर्जनः ॥

८

न विना परवादेन, रमते दुर्जनो जनः ।
काकः सर्वरसान् भुङ्क्ते, विनाऽमेध्यं न तृप्यति ॥

९

दुर्जनो दोषामादत्ते, दुर्गन्धमिव सूकरः ॥
सज्जनश्च गुणग्राही, हंसः क्षीरमिवाम्भसः ॥

१०

दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे, हृदि हालाहलं विषम् ॥

११

दुर्जनस्य विशिष्टत्वं, परोपद्रवकारणम् ।
व्याघ्रस्य चोपवासेन, पारणं पशुमारणम् ॥

१२

मुखं पद्मदलाकारं, वाचा चन्दनशीतला ।
हृदयं क्रोधसंयुक्तं, त्रिविधं धूर्तलक्षणम् ॥

१३

कापुरुषः कुक्कुरश्च, भोजनैकपरायणः ।
लालितः पार्श्वमायाति, वारितो न च गच्छति ॥

१४

खलानां कण्टकानाञ्च, द्विविधैव प्रतिक्रिया ।
उपानन्मुखभङ्गो वा, दूरतो वाऽपि वर्जनम् ॥

१५

दुर्जनः स्वस्वभावेन, परकार्यं विनश्यति ।
नोदरतृप्तिमायाति, मूषको वस्त्रभक्षकः ॥

१६

तक्षकस्य विषं दन्ते, मक्षिकाया विषं शिरः ।
वृश्चिकस्य विषं पुच्छे, सर्वाङ्गे दुर्जनो विषम् ॥

१७

यथा परोपकारेषु, नित्यं जागर्ति सज्जनः ।
तथा परापकारेषु, जागर्ति सततं खलः ॥

१८

अनिष्टादिष्टलाभेऽपि, न गतिर्जायते शुभा ।
यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ॥

१९

दुर्जनदूषितमनसां, पुंसां सुजनेऽप्यविश्वासः ।
बालः पायसदग्धो, दध्यपि फूत्कृत्य भक्षयति ॥

२०

शकटं पञ्चहस्तेन, दशहस्तेन वाजिनम् ।
गजं हस्तसहस्रेण, देशत्यागेन दुर्जनम् ॥

२१

न देवाय न धर्माय, न बन्धुभ्यो न चार्थिने ।
दुर्जनेनार्जितं द्रव्यं, भुज्यते राजतस्करैः ॥

२२

विपुलहृदयाभियोग्ये खिद्यति,काव्ये जडो न मौर्ख्ये स्वे
निन्दति कञ्चुकिकारं, प्रायः शुष्कस्तनी नारी ॥

२३

दुर्जनं सज्जनं कर्तुमुपायो नहि भूतले ।
अपानं शतधा धौतं, न श्रेष्ठमिन्द्रियं भवेत् ॥

२४

पापं वर्धयते चिनोति कुमतिं कीर्त्यङ्गनां नश्यति ।
धर्मं ध्वंसयते तनोति विपदं सम्पत्तिमुन्मर्दति ॥
नीतिं हन्ति विनीतिमत्र कुरुते कोपं धुनीते शमं ।
किं वा दुर्जनसंगतिर्न कुरुते लोकद्वयध्वंसिनी ॥

२५

त्यक्त्वा मौक्तिकसंहतिकरटिनो गृह्णन्ति काकाः पलं ।
त्यक्त्वा चन्दनमाश्रयन्ति कुथितं योनिक्षतं मक्षिकाः ॥
हित्वान्नं विविधं मनोहररसं श्वानो मलं भुञ्जते ।
यद्वल्लांति गुणं विहाय सततं दोषं तथा दुर्जनाः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२६

खलः सर्षपमात्राणि, परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि, पश्यन्नपि न पश्यति ॥

२७

सर्पः क्रूरः खलः क्रूरः, सर्पात्क्रूरतरः खलः ।
मंत्रेण शाम्यते सर्पो, न खलः शाम्यते कदा ॥

२८

दुर्जनो नार्जवं याति, सेव्यमानोऽपि नित्यशः ।
स्वेदनाभ्यञ्जनोपायैः, श्वपुच्छमिव नामितम् ॥

२९

पाषाणो भिद्यते टङ्कैर्वज्रः, वज्रेण भिद्यते ।
सर्पोऽपि भिद्यते मंत्रैर्दुष्टात्मा, नैव भिद्यते ॥

३०

यथा गजपतिः श्रान्तश्छायार्थी वृक्षमाश्रितः ।
विश्रम्य तं द्रुमं हन्ति, तथा नीचः स्वमाश्रयम् ॥

३१

नष्टमपात्रे दानं, नष्टं हितमफलबुद्ध्यवज्ञाने ।
नष्टो गुणोऽगुणज्ञे, नष्टं दाक्षिण्यमकृतज्ञे ॥

३२

 मृगमदकर्पूरागुरुचन्दनगन्धाधिवासितो लशुनः ।
न त्यजति गंधमशुभं, प्रकृतिमिव सहोत्थितां नीचः ॥

३३

तुष्यन्ति भोजनैर्विप्रा, मयूरा घनगर्जितैः ।
साधवः परकल्याणैः, खला परविपत्तिभिः ॥

३४

न दुर्जनः सज्जनतामुपैति, बहुप्रकारैरपि सेव्यमानः ।
अत्यंतसिक्तः पयसा घृतेन, न निम्बवृक्षो मधुतामुपैति ॥

३५

कृतवैरे न विश्वासः कार्यस्त्विह सुहृद्यपि ।
छन्नं संतिष्ठते वैरं गूढोऽग्निरिव दारुषु ॥

३६

असारस्य पदार्थस्य प्रायेणाडम्बरो महान् ।
नहि तादृग् ध्वनिः स्वर्णे यादृशः कांस्यभाजने ॥

३७

अतिरमणीये काव्येऽपि पिशुनो दूषणमन्वेषयति ।
अतिरमणीये वपुषि व्रणमिव मक्षिकानिकरः ॥

## मूर्ख ।

१

वरं पर्वतदुर्गेषु, भ्रांतं वनचरैः सह ।
न मूर्खजनसंसर्गः सुरेन्द्रभुवनेष्वपि ॥

२

मूर्खस्य पञ्च चिह्नानि, गर्वो दुर्वचनं मुखे ।
हठी चैव विषादी च, परोक्तं नैव मन्यते ॥

३

मूर्खोऽपि मूर्खं दृष्ट्वा च, चन्दनादपि शीतलः ।
यदि पश्यसि विद्वांसं, मन्यते पितृघातकम् ॥

४

उपदेशो हि मूर्खाणां, प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां, केवलं विषवर्धनम् ॥

५

अत्याचारो ह्यनाचारोऽत्यन्तनिन्दाऽति संस्तुतिः ।
अति शौचमशौचं वा, षड्विधं मूर्खलक्षणम् ॥

६

मदोपशमनं शास्त्रं, खलानां कुरुते मदम् ।
चक्षुःप्रकाशकं तेजः उलूकानामिवान्धताम् ॥

७

शोभते विदुषां मध्ये, नैव निर्गुणमानसः ।
अन्तरे तमसां दीपः, शोभते नार्कतेजसाम् ॥

८

काव्यशास्त्रविनोदेन, कालो गच्छति धीमताम् । 
व्यसनेन तु मूर्खाणां, निद्रया कलहेन वा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

मूर्खोऽपि शोभते तावत्सभायां वस्त्रवेष्टितः।
तावच्च शोभते मूर्खो, यावत्किञ्चिन्न भाषते ॥

१०

अज्ञः सुखमाराध्यः, सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं, ब्रह्मापि तं नरं न रञ्जयति ॥

११

खादन्न गच्छामि हसन्न जल्पे,
गतं न शोचामि कृतं न मन्ये।
द्वाभ्यां तृतीयो न भवामि राजन्,
किं कारणं भोज भवानि मूर्खः ॥

१२

द्वौ हस्तौ द्वौ तु पादौ च, दृश्यते पुरुषाकृतिः।
शीतकालहरं मूढो, गृहं किन्न करोषि भोः ॥

१३

 उपदेशो न दातव्यो, यादृशे तादृशे नरे।
पश्य वानरमूर्खेण, सुगृही निगृही कृता ॥

१४

किं करोति गुरुः प्राज्ञः, मिथ्यात्वमूढचेतसां।
शिष्याणां पापरक्तानां, मंखलीपुत्रसदृशाम् ॥

१५

यथा खरश्चंदनभारवाही, भारस्य वेत्ता नतु चंदनस्य।
एवं हि शास्त्राणि बहून्यधीत्य, चार्थेषु मूढाः खरवद् वहन्ति

१६

प्रायेणात्र कुलान्वितं कुकुलजाः श्रीवल्लभं दुर्भगाः।
दातारं कृपणा ऋजूननृजवस्तेजस्विनं कातराः ॥
वैरूप्योपहताश्च कान्तवपुषं धर्माश्रयं पापिनो।
नानाशास्त्रविचक्षणं च, पुरुषं निन्दति मूर्खा जनाः ॥

१७

आलस्यं गर्वितं निद्रा, परहस्ते च लेखकः।
अल्पबुद्धिर्विवादी च, मूर्खाणां लक्षणानि षट् ॥

१८

मूर्खत्वं हि सखे ममापि रुचितं तस्मिन् यदष्टौ गुणा–
निश्चिन्तो बहुभोजनोऽति मुखरो रात्रिंदिवा स्वप्नभाक् ॥
कार्याकार्यविचारणान्धबधिरो मानापमाने समः।
प्रायेणामयवर्जितो दृढवपुर्मूर्खः सुखं जीवति ॥

१९

शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो–
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ॥
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं।
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥

२०

मुक्ताफलैः किं मृगपक्षिणां च।
मिष्टान्नपानं किमु गर्दभानाम् ॥
अन्धस्य दीपो बधिरस्य गीतं।
मूर्खस्य किं धर्मकथाप्रसङ्गः ॥

२१

वरं दरिद्रः श्रुतिशास्त्रपारगो।
न चापि मूर्खो बहुरत्नसंयुतः ॥
सुलोचना जीर्णपटाऽपि शोभते।
न नेत्रहीना कनकैरलंकृता ॥

२२

सुखप्रदर्श्यं दुःखं, स्याद्यदि वादेन किं फलम्। 
म्रियेत चेद् गुडं दत्वा, किं विषेण प्रयोजनम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२३

वह्निनाऽपि न सिध्यंति यथा [1]कंकटुकाः कणाः ।
तथा सिद्धिरभव्यानां जिनेनाऽपि न जायते ॥

२४

यथोषरक्षिप्तं धान्यं न स्याद् वृष्टेऽपि नीरदे ।
बोधो न स्यादभव्यानां जिनदेशनया तथा ॥

## पण्डितः ।

१

पण्डिते हि गुणाः सर्वे, मूर्खे दोषाश्च केवलाः ।
तस्मान्मूर्खसहस्रेभ्यः, प्राज्ञ एको विशिष्यते ॥

२

शोकस्थानसहस्राणि, भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥

३

निषेवते प्रशस्तानि, निन्दितानि न सेवते ।
अनास्तिकः श्रद्धधान एतत्पण्डितलक्षणम् ॥

४

आर्यकर्मणि रज्यन्ते, भूतिकर्माणि कुर्वते ।
हितञ्च नाभ्यसूयन्ति, पण्डिता भरतर्षभ ॥

५

आत्मज्ञानं समारम्भस्तितिक्षा धर्मनित्यता ।
यमर्था नापकर्षन्ति, स वै पण्डित उच्यते ॥

६

यत्र विद्वज्जनो नास्ति, श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥

७

स्वगृहे पूज्यते मूर्खः, स्वग्रामे पूज्यते प्रभुः ।
स्वदेशे पूज्यते राजा, विद्वान्सर्वत्र पूज्यते ॥

८

पण्डितो हि वरं शत्रुर्न मूर्खो हितकारकः ।
वानरेण हतो राजा, विप्रचौरेण रक्षितः ॥

९

मातृवत्परदारांश्च, परद्रव्याणि लोष्ठवत् ।
आत्मवत्सर्वभूतानि, यः पश्यति स पंडितः ॥

१०

वैद्यं पानरतं नटं कुपठितं स्वाध्यायहीनं द्विजं ।
योधं कापुरुषं हयं गतरयं मूर्खं परिव्राजकम् ॥
राजानं च कुमन्त्रिभिः परिवृतं देशं च सोपद्रवं ।
भार्यां यौवनगर्विता पररतां मुञ्चन्ति ते पण्डिताः ॥

११

पण्डितैः सह साङ्गत्यं, पण्डितैः सह संकथा ।
पण्डितैः सह मित्रत्वं, कुर्वाणो नावसीदति ॥

१२

विद्याविनयसम्पन्ने, ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च, पण्डिताः समदर्शिनः ॥

१३

आत्मौपम्येन सर्वत्र, समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं, स योगी परमो मतः ॥

१४

जानन्ति पशवो गन्धाद्वेदाज्जानन्ति पण्डिताः ।
चाराज्जानन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥

१५

छन्दो व्याकरणं निघण्टुगणितं तर्कागमो ज्योतिषं ।
शिक्षासूत्रविकल्पवैद्यकमलं काव्यं पुराणं तथा ॥
चम्पूनाटकनाटिकाप्रहसनं कण्ठीकृतं प्रायशः ।
स्याच्चेतश्च विवेकबीजरहितं सर्वं हि भारायते ॥

१६

गर्वं नोद्वहते न निंदति परं नो भाषते निष्ठुरं ।
प्रोक्तः केनचिदप्रियाणि सहते क्रोधं च नालंबते ॥

[1] धान्य जाति ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुत्वा काव्यमलक्षणं परकृतं संतिष्ठते मूकवत् ।
दोषांश्छादयति स्वयं न कुरुते पाण्डित्यमष्टौ गुणाः ॥

## विद्या ।

१

अपूर्वः कोऽपि कोशोऽयं, विद्यते तव भारति ।
व्ययतो वृद्धिमायाति, क्षयमायाति संचयात् ॥

२

अनेकसंशयोच्छेदि, परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं, यस्य नास्त्यन्ध एव सः ॥

३

शुनः पुच्छमिव व्यर्थं, जीवितं विद्यया विना ।
न गुह्यगोपने शक्तं, न च दंशनिवारणे ॥

४

विद्या शस्त्रं च शास्त्रं च, द्वे विद्ये प्रतिपत्तये ।
आद्या हास्याय वृद्धत्वे, द्वितीयाद्रियते सदा ॥

५

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं ।
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ॥
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं ।
विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥

६

द्यूतं पुस्तकवाद्ये च, नाटकेषु च सक्तिता ।
स्त्रियस्तन्द्रा च निद्रा च, विद्याविघ्नकराणि षट् ॥

७

किं कुलेन विशालेन, विद्याहीनस्य देहिनः ।
अकुलीनोऽपि विद्यावान्देवैरपि स पूज्यते ॥

८

विद्वानेव विजानाति, विद्वज्जनपरिश्रमम् ।
नहि वन्ध्या विजानाति, गुर्वीं प्रसववेदनाम् ॥

९

विद्वत्वं च नृपत्वं च, नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥

१०

यस्य नास्ति स्वयं प्रज्ञा, शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य, दर्पणः किं करिष्यति ॥

११

जलबिन्दुनिपातेन, क्रमशः पूर्यते घटः ।
स हेतुः सर्वविद्यानां, धर्मस्य च धनस्य च ॥

१२

रूपयौवनसंपन्ना. विशालकुलसंभवाः ।
विद्याहीना न शोभन्ते, निर्गन्धाः किंशुका इव ॥

१३

माता शत्रुः पिता वैरी, येन बालो न पाठितः ।
न शोभते सभामध्ये, हंसमध्ये बको यथा ॥

१४

अनर्घ्यमपि माणिक्यं, हेमाश्रयमपेक्षते ।
अनाश्रया न शोभंते, पण्डिता वनिता लताः ॥

१५

नक्षत्रभूषणं चन्द्रो, नारीणां भूषणं पतिः ।
पृथिवी भूषणं राजा, विद्या सर्वस्य भूषणं ॥

१६

सुखार्थी त्यजते विद्यां, विद्यार्थी त्यजते सुखम् ।
सुखार्थिनः कुतो विद्या, कुतो विद्यार्थिनः सुखम् ॥

१७

अन्नदानात्परं दानं, विद्यादानमतः परम् ।
अन्नेन क्षणिका तृप्तिर्यावज्जीवं च विद्यया ॥

१८

श्रुत्वा धर्मं विजानाति, श्रुत्वा त्यजति दुर्मतिम् ।
श्रुत्वा ज्ञानमवाप्नोति, श्रुत्वा मोक्षं च विन्दति ॥

१९

कोकिलानां स्वरो रूपं, नारीरूपं पतिव्रतम् ।
विद्या रूपं कुरूपाणां, क्षमा रूपं तपस्विनाम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२०

वस्त्रहीनस्त्वलंकारो, घृतहीनं च भोजनम् ।
स्तनहीना च या नारी, विद्याहीनं च जीवनम् ॥

२१

कोऽति भारः समर्थानां, किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां, कः परः प्रियवादिनाम् ॥

२२

न च विद्यासमो बन्धुर्न, च व्याधिसमो रिपुः ।
न चापत्यसमः स्नेहो, न च दैवात्परं बलम् ॥

२३

पुस्तकस्था तु या विद्या, परहस्तगतं धनम् ।
कार्यकाले समुत्पन्ने, न सा विद्या न तद्धनम् ॥

२४

नास्ति विद्यासमं चक्षुर्नास्ति सत्यसमं तपः ।
नास्ति रागसमं दुःखं, नास्ति त्यागसमं सुखम् ॥

२५

काकचेष्टा बकध्यानं, श्वाननिद्रा तथैव च ।
स्वल्पाहारः स्त्रियस्त्यागी, विद्यार्थी पञ्चलक्षणः ॥

२६

कामक्रोधौ तथा लोभं, स्वादुश्रृङ्गारकौतुकम् ।
अतिनिद्रातिसेवे च, विद्यार्थी ह्यष्ट वर्जयेत् ॥

२७

मातासमं नास्ति शरीरपोषणं,
चिन्तासमं नास्ति शरीरशोषणम् ।
भार्यासमं नास्ति शरीरतोषणं,
विद्यासमं नास्ति शरीरभूषणम् ॥

२८

हंसो विभाति नलिनीदलपुञ्जमध्ये,
सिंहो विभाति गिरिगह्वरकंदरासु ।
जात्यो विभाति तुरगो रणयुद्धमध्ये,
विद्वान् विभाति पुरुषेषु विचक्षणेषु ॥

२९

न चौरहार्यं न च राजहार्यं,
न भ्रातृभाज्यं न च भारकारी ।
व्यये कृते वर्धत एव नित्यं,
विद्याधनं सर्वधनप्रधानम् ॥

३०

हंसो न भाति बलिभोजनवृन्दमध्ये,
गोमायुमण्डलगतो न विभाति सिंहः ।
जात्यो न भाति तुरगः खरयूथमध्ये,
विद्वान्न भाति पुरुषेषु निरक्षरेषु ॥

३१

कलारत्नं गीतं गगनतलरत्नं दिनमणिः ।
सभारत्नं विद्वान् श्रवणपुटरत्नं प्रभुकथा ॥

३२

निशारत्नं चन्द्रः शयनतलरत्नं शशिमुखी ।
महीरत्नं श्रीमाञ्जयति रघुनाथो नृपवरः ॥

३३

कलासीमा काव्यं सकलगुणसीमा वितरणं ।
भये सीमा मृत्युः सकलसुखसीमा सुवदना ॥
तपःसीमा मुक्तिः सकलकृतिसीमाश्रितभृतिः ।
प्रिये सीमाह्लादः श्रवणसुखसीमा प्रभुकथा ॥

३४

आलस्येन हता विद्या आलापेन किल स्त्रियः ।
अल्पबीजं हतं क्षेत्रं, हतं सैन्यमनायकम् ॥

३५

आचार्यपुस्तकनिवाससहायवासो,
बाह्या इमे पठनपंचगुणा नराणाम् ।
आरोग्यबुद्धिविनयोद्यमशास्त्ररागा,
आभ्यंतराः पठनसिद्धिकरा भवन्ति ॥



For Private And Personal Use Only

३६

विद्याधनं श्रेष्ठधनं, तन्मूलमितरद्धनम् ।
दानेन वर्द्धते नित्यं, न भाराय न नीयते ॥

३७

विद्या ददाति विनयं, विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति, धनाद्धर्मं ततः सुखम् ॥

३८

विद्यया शस्यते लोके, पूज्यते चोत्तमैः सदा ।
विद्याहीनो नरः प्राज्ञः, सभायां नैव शोभते ॥

३९

धर्माधर्मौ न जानाति, लोकोऽयं विद्यया विना ।
तस्मात् सदैव धर्मात्मा, विद्यादानपरो भवेत् ॥

४०

कामधेनुगुणा विद्या ह्यकाले फलदायिनी ।
प्रवासे मातृसदृशी, विद्या गुप्तं धनं स्मृतम् ॥

४१

किं तस्य मानुषत्वेन, बुद्धिर्यस्य न निर्मला ।
बुद्ध्याऽपि किं फलन्तस्य, येन विद्या न सञ्चिता ॥

४२

पुस्तकेषु च नाधीतं, नाधीतं गुरुसन्निधौ ।
न शोभते सभामध्ये, हंसमध्ये बको यथा ॥

४३

अनभ्यासे विषं विद्या, अजीर्णे भोजनं विषं ।
मूर्खस्य च विषं गोष्ठी, वृद्धस्य तरुणी विषम् ॥

## कालचरितम् ।

१

मृत्योर्बिभेषि किं मूढ !, भीतं मुञ्चति नो यमः ।
अजातं नैव गृह्णाति, कुरु ! यत्नमजन्मनि ॥

२

पुनः प्रभातं पुनरेव शर्वरी,
पुनः शशाङ्कः पुनरुद्यते रविः ।
कालस्य किं गच्छति याति यौवनं,
तथापि लोकः कथितं न बुध्यते ॥

३

मातुलो यस्य गोविन्दः, पिता यस्य धनञ्जयः ।
सोऽपि कालवशं प्राप्तः, कालो हि दुरतिक्रमः ॥

४

पुरन्दरसहस्राणि, चक्रवर्तिशतानि च ।
निर्वापितानि कालेन, प्रदीपा इव वायुना ॥

५

म्रियमाणं मृतं बन्धुं, शोचन्ते परिदेविनः ।
आत्मानं नानुशोचन्ति, कालेन कवलीकृतम् ॥

६

अद्यैव हसितं गीतं, पठितं यैः शरीरिभिः ।
अद्यैव ते न दृश्यन्ते, कष्टं कालस्य चेष्टितम् ॥

७

पण्डिते चैव मूर्खे च, बलवत्यपि निर्बले ।
ईश्वरे च दरिद्रे च, मृत्योः सर्वत्र तुल्यता ॥

८

कालः पचति भूतानि, कालः संहरते तथा ।
कालः सुप्तेषु जागर्ति, कालो हि दुरतिक्रमः ॥

९

मृत्युर्जन्मवतां वीर !, देहेन सह जायते ।
अद्य वाऽब्दशतान्ते वा, मृत्युर्वै प्राणिनां ध्रुवः ॥

१०

तुल्यजातिवयोरूपान्हतान्पश्यसि मृत्युना ।
कथं ते नास्ति निर्वेदो, लोहं हि हृदयं तव ॥

११

किं श्रिया किञ्च राज्येन, किं कामेन किमीहितैः ।
दिनैः कतिपयैरेव, कालः सर्वं निकृन्तति ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१२

न चास्त्रेण न शौर्येण, तपसा मेधया न च ।
न धृत्या न पुनस्त्यागान्मृत्योः कश्चिद्विमुच्यते ॥

१३

अनतिक्रमणीयो वै, विधिरेष युधिष्ठिर ! ।
देवदानवगन्धर्वान्मृत्युर्हरति भारत ! ॥

१४

महाविद्योऽल्पविद्यश्च बलवान्दुर्बलश्च यः ।
दर्शनीयो विरूपश्च, सुभगो दुर्भगश्च यः ॥

१५

सर्वं कालः समादत्ते, गम्भीरः स्वेन तेजसा ।
तस्मिन्कालवशं प्राप्ते, का व्यथा मे विजानितः ॥

१६

इदमद्य करिष्यामि, श्वः कर्ताऽस्मीति वादिनम् ।
कालो हरति संप्राप्तो, नदीवेग इव द्रुमम् ॥

१७

नश्यन्त्यर्थास्तथा भोगाः, स्थानमैश्वर्यमेव च ।
जीवितं जीवलोकस्य, कालेनागम्य नीयते ॥

१८

४७ नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि ।
तृणाग्रेन सुसंस्पृष्टः प्राप्तकालो न जीवति ॥

१९

न मन्त्रा न तपो दानं, न मित्राणि न बान्धवाः ।
शक्नुवन्ति परित्रातुं, नरं कालेन पीडितम् ॥

२०

यथा व्यालगलस्थोऽपि, भेको दंशानपेक्षते ।
तथा कालाहिना ग्रस्तो, लोको भोगानशाश्वतान् ॥

२१

न कालस्य प्रियः कश्चिद्, द्वेष्यश्चास्य न विद्यते ।
आयुष्ये कर्मणि क्षीणे, प्रसह्य हरते जनम् ॥

२२

हा कान्ते ! हा धनं पुत्राः, क्रन्दमानः सुदारुणम् ।
मण्डूक इव सर्पेण, मृत्युना गीर्यते नरः ॥

२३

यस्य वा मृत्युना सख्यं, यो वा स्यादजरामरः ।
तस्येदं युज्यते वक्तुमिदं श्वो मे भविष्यति ॥

२४

बलिनो मृत्युसिंहस्य, संसारवनचारिणः ।
शृण्वन् व्याधिजरानादान्, कथं तिष्ठसि निर्भयः ॥

२५

दशवर्षाः षोडशिका, विंशस्त्रिंशतिकास्तथा ।
सर्वे वर्षशतादूर्ध्वं, न भविष्यंति मानवाः ॥

२६

स्वमस्तकसमारूढं, मृत्युं पश्येज्जनो यदि ।
आहारोऽपि न रोचेत, किमुतान्या विभूतयः ॥

२७

को मोदते किमाश्चर्यं, कः पन्थाः का च वार्तिका ।
वद मे चतुरः प्रश्नान्मृता जीवन्तु बान्धवाः ॥

२८

पञ्चमेऽहनि षष्ठे वा, शाकं पचति यो गृहे ।
अनृणी चाप्रवासी च, स वारिचर मोदते ॥

२९

अहन्यहनि भूतानि, गच्छन्तीह यमालयम् ।
शेषाः स्थावरमिच्छन्ति, किमाश्चर्यमतः परम् ॥

३०

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना,
नैको ऋषिर्यस्य मतं प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां,
महाजनो येन गतः स पन्थाः ॥

३१

अस्मिन्महामोहमये कटाहे,सूर्याग्निना रात्रिदिवेन्धनेन ५०
मासर्तुदर्वीपरिघट्टनेन, भूतानि कालः पचतीति वार्ता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३२

चला विभूतिः क्षणभङ्गि यौवनं ।
कृतान्तदन्तान्तर्वर्ति जीवितम् ॥
तथाप्यवज्ञा परलोकसाधने ।
नृणामहो विस्मयकारि चेष्टितम् ॥

३३

रामे प्रव्रजनं बलेर्नियमनं पाण्डोः सुतानां वनं ।
वृष्णीनां निधनं नलस्य नृपते राज्यात्परिभ्रंशनम् ॥
नाठ्याचार्यकमर्जुनस्य पतनं संचिन्त्य लङ्केश्वरे ।
सर्वः कालवशेन नश्यति नरः को वा परित्रायते ॥

३४

आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं ।
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ॥
लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं ।
तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥

३५

कालः समविषमकरः, परिभवसंमानकारकः कालः ।
कालः करोति पुरुषं, दातारं याचितारं च ॥

३६

भुवि यान्ति हयद्विपमार्त्यजना,
गगने शकुनिग्रहशीतकराः ।
जलजन्तुगणाश्च जले बलवान्,
[1]समवर्ति विभुर्निखिले भुवने ॥

३७

चन्द्रादित्यपुरंदरक्षितिधरश्रीकंठ[2]सीर्यादयो ।
ये कीर्तिद्युतिकान्तिधीधनबलप्रख्यातपुण्योदयाः ॥
स्वे स्वे तेऽपि कृतान्तदन्तकलिताः काले व्रजन्ति क्षयं ।
किं चान्येषु कथा सुचारु मतयो धर्मे मतिं कुर्वतां ॥

# परोपकारः ।

१

परोपकारः कर्तव्यः, प्राणैरपि धनैरपि ।
परोपकारजं पुण्यं, न स्यात्क्रतुशतैरपि ॥

२

धनानि जीवितं चैव, परार्थे प्राज्ञ उत्सृजेत् ।
तन्निमित्तो वरं त्यागो, विनाशे नियते सति ॥

३

रविश्चन्द्रो घना वृक्षा, नदी गावश्च सज्जनाः ।
एते परोपकाराय, युगे दैवेन निर्मिताः ॥

१ यमराज, २ राम बलदेव ।

४

आत्मार्थं जीवलोकेस्मिन्को न जीवति मानवः ।
परं परोपकारार्थं, यो जीवति स जीवति ॥

५

परोपकारशून्यस्य, धिङ् मनुष्यस्य जीवितम् ।
जीवन्तु पशवो येषां, चर्माप्युपकरिष्यति ॥

६

परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः, परोपकारार्थमिदं शरीरम् ॥

७

परोपकरणं येषां, जागर्ति हृदये सताम् ।
विपदश्चैव नश्यन्ति, सम्पदः स्युः पदे पदे ॥

८

तृणञ्चाहं वरं मन्ये, नरादनुपकारिणः ।
घासो भूत्वा पशून्पाति, भीरून्पाति रणाङ्गणे ॥

९

जीवितान्मरणं श्रेष्ठं, परोपकृतिवर्जितात् ।
मरणं जीवितं मन्ये, यत्परोपकृतिक्षमम् ॥

१०

विद्याविलासमनसो धृतशीलशिक्षाः ।
सत्यव्रता रहितमानमलापहाराः ॥



For Private And Personal Use Only

संसारदुःखदलनेन सुभूषिता ये ।
धन्या नरा विहितकर्मपरोपकाराः ॥

११

परदुःखप्रतीकारमेव ध्यायन्ति ये हृदि ।
लभन्ते निर्विकारं ते, सुखमायति सुन्दरम् ॥

१२

सर्वत्र खलु दृश्यन्ते, साधवो धर्मचारिणः ।
शूराः शरण्याः [1]सौमित्रे, तिर्यग्योनिगतेष्वपि ॥

१३

श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कंकणेन ।
विभाति कायः करुणापराणां, परोपकारैर्न तु चन्दनेन ॥

१४

पद्माकरं दिनकरो विकचीकरोति,
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति,
सन्तः स्वयं परहिते सुकृताभियोगाः ॥

१५

अष्टादश पुराणेषु, व्यासस्य वचनं द्वयम् ।
परोपकारः पुण्याय, पापाय परपीडनम् ॥

१ हे लक्ष्मण ।

१६

परकार्यरतो नूनं, सरलो विरलो जनः ।
परदुःखस्य दुःखेन, पीड्यन्ते विरला जनाः ॥

१७

अपकारिषु मा पापं, चिंतय त्वं कदाचन ।
स्वयमेव पतिष्यन्ति, [1]कूलजाता इव द्रुमाः ॥

१८

सुघरीकाकचट्यादि, पक्षिणोऽपि अनेकशः ।
कुर्वन्ते स्वगृहं यत्नात् न पुण्यं तत्र जायते ॥

## जीवितसाफल्यम् ।

१

वाणी रसवती यस्य, भार्या पुत्रवती सती ।
लक्ष्मीर्दानवती यस्य, सफलं तस्य जीवितम् ॥

२

स जीवति गुणा यस्य, धर्मो यस्य स जीवति ।
गुणधर्मविहीनो यो, निष्फलं तस्य जीवितम् ॥

३

दानोपभोगरहिता, दिवसा यस्य यान्ति वै ।
स लोहकारभस्त्रेव, श्वसन्नपि न जीवति ॥

१ तीर ।

४

यस्य जीवन्ति धर्मेण, पुत्रा मित्राणि बान्धवाः ।
सफलं जीवितं तस्य, नात्मार्थे को हि जीवति ॥

५

यस्मिन् जीवति जीवन्ति, बहवः स तु जीवति ।
काकोपि किन्न कुरुते, चंच्वा स्वोदरपूरणम् ॥

६

आत्मार्थं जीवलोकेऽस्मिन्को न जीवति मानवः ।
परं परोपकारार्थं, यो जीवति स जीवति ॥

७

चलं वित्तं चलं चित्तं, चले जीवितयौवने ।
चलाचलमिदं सर्वं, कीर्तिर्यस्य स जीवति ॥

८

आनंदरूपो निजबोधरूपो,
दिव्यस्वरूपो बहुनामरूपः ।
तपःसमाधौ कलितो न येन,
वृथा गतं तस्य नरस्य जीवितम् ॥

९

माया करण्डी नरकस्य हण्डी,
तपोविखण्डी सुकृतस्य भंडी ।
तृष्णा विखण्डी चिरसेविता चेद्,
वृथा गतं तस्य नरस्य जीवितम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## वृथाजन्म ।

१

उत्तमा आत्मना ख्याताः, पित्रा ख्याताश्च मध्यमाः ।
मातुलेनाधमाः ख्याताः, श्वशुरेणाधमाधमाः ॥

२

न संध्यां संधत्ते नियमितनमाज़ं न कुरुते ।
न वा मौंजीबन्धं कलयति न वा सुन्नतविधिम् ॥
न रोजां जानीते व्रतमपि हरेर्नैव कुरुते ।
न काशी मक्का वा शिवशिव न हिन्दुर्न यवनः ॥

३

पठन्ति चतुरो वेदान्, धर्मशास्त्राण्यनेकशः ।
आत्मानं नैव जानन्ति, [1]दर्वी पाकरसं यथा ॥

## मनुष्य भव के दस दृष्टान्त ।

१

विप्रः प्रार्थितवान् प्रसन्नमनसः श्रीब्रह्मदत्तात् पुरा ।
क्षेत्रेऽस्मिन् भरतेऽखिले प्रतिगृहं मे भोजनं दापय ॥
इत्थं लब्धवरोऽथ तेष्वपि कदाप्यश्नात्यहो द्विः स चेद् ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥

[1] कुडछी ।

२

स्तम्भानां हि सहस्रमष्टसहितं प्रत्येकमष्टोत्तरं ।
कोणानां शतमेषु तानपि जयन् द्यूतेऽथ तत्संख्यया ॥
साम्राज्यं जनकात्सुतः स लभते स्याच्चेदिदं दुर्घटं ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥

३

वृद्धा कापि पुरा समस्तभरतक्षेत्रस्य धान्यावलिं ।
पिण्डीकृत्य च तत्र सर्षपकणान् क्षिप्त्वाढकेनोन्मितान् ॥
प्रत्येकं हि पृथक्करोति किल सा सर्वाणि चान्नानि चेद् ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥

४

सिद्धद्यूतकलाबलाद्धनिजनं जित्वाथ हेम्नां भरै-
श्चाणक्येन नृपस्य कोशनिवहः पूर्णीकृतो हेलया ॥
दैवादाढ्यजनेन तेन स पुनर्जीयेत मन्त्री क्वचित् ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥

५

रत्नान्याढ्यसुतैर्वितीर्य वणिजां देशान्तरादीयुषां ।
पश्चात्तापवशेन तानि पुनरादातुं कृतोपक्रमैः ॥
लभ्यन्ते निखिलानि दुर्घटमिदं दैवाद् घटेत्तत्क्वचित् ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥

६

स्वप्ने कार्पटिकेन रात्रिविगमे श्रीमूलदेवेन च ।
प्रेक्ष्येन्दुं सकलं कुनिर्णयवशादल्पं फलं प्राप्य च ॥
स्वप्नस्तेन पुनः स तत्र शयितेनालोक्यते कुत्रचित् ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥

७

राधाया वदनादधः क्रमवशाच्चक्राणि चत्वार्यपि ।
भ्राम्यन्तीह विपर्ययेण तदधो धन्वी स्थितोऽवाङ्मुखः ॥
तस्या वामकनीनिकामिषुमुखेनैवाशु विध्यत्यहो ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥

८

दृष्ट्वा कोपि हि कच्छपो ह्रदमुखे सेवालबन्धच्युते ।
पूर्णेन्दुं मुदितः कुटुम्बमिह तं द्रष्टुं समानीतवान् ॥
सेवाले मिलिते कदापि स पुनश्चन्द्रं समालोकते ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥

९

शम्या पूर्वपयोनिधौ निपतिता भ्रष्टं युगं पश्चिमा-
म्भोधौ दुर्धरवीचिभिश्च सुचिरात्संयोजितं तद्द्वयम् ॥
सा शम्या प्रविशेद्युगस्य विवरे तस्य स्वयं क्वापि चेत् ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥



For Private And Personal Use Only

१०

चूर्णीकृत्य पराक्रमान्मणिमयं स्तम्भं सुरः क्रीडया ।
मेरौ सन्नलिकासमीरवशतः क्षिप्त्वा रजो दिक्षु चेत् ॥
स्तम्भं तैः परमाणुभिः सुमिलितैः कुर्यात्स चेत्पूर्ववत् ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥

## उपदेश ।

१

का विद्या कवितां विनार्थिनि जने त्यागं विना श्रीश्च का ।
को धर्मः कृपया विना क्षितिपतिः को नाम नीतिं विना॥
कः सूनुर्विनयं विना कुलवधूः का स्वामिभक्तिं विना ।
भोग्यं किं रमणीं विना क्षितितले किं जन्म कीर्तिं विना॥

२

चेतोहरा युवतयः स्वजनोऽनुकूलः ।
सद्बांधवाः प्रणतिनम्रगिरश्च भृत्याः ॥
[1]गर्जन्ति दन्तिनिवहास्तरलास्तुरङ्गाः ।
संमीलने नयनयोर्नहि किंचिदस्ति ॥

३


मानुष्यं वरवंशजन्म विभवो दीर्घायुरारोग्यता ।
सन्मित्रं सुसुतः सती प्रियतमा भक्तिश्च तीर्थंकरे ॥

विद्वत्त्वं सुजनत्वमिन्द्रियजयः सत्पात्रदाने रति-
स्ते पुण्येन विना त्रयोदश गुणाः संसारिणां दुर्लभाः ॥

४

अनित्यं यौवनं रूपं, जीवितं द्रव्यसञ्चयः ।
ऐश्वर्यं प्रियसंवासो, मुह्येत्तत्र न पण्डितः ॥

५

येषां न विद्या न तपो न दानं,
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूता
मनुष्यरूपेण [1]मृगाश्चरन्ति ॥

६

नो दानं विहितं तपो न चरितं शीलं च नो पालितं ।
तत्त्वातत्त्वविचारणा च न कृता नो भावना भाविताः ॥
सेवा साधुजनस्य भक्तिरमला नाकारि किञ्चिच्छुभं ।
हा कष्टं विफलं गतो नरभवोऽरण्ये यथा मालती ॥

७

नरेषु [2]चक्री त्रिदशेषु [3]वज्री,
मृगेषु सिंहः प्रशमो व्रतेषु ।
मतो [4]महीभृत्सु सुवर्णशैलो,
भवेषु मानुष्यभवःप्रधानः ॥

१ पशु, २ चक्रवर्ती, ३ इन्द्र, ४ पर्वत ।

८

[1]शमेन नीतिर्विनयेन विद्या, शौचेन कीर्त्तिस्तपसा सपर्या
विना नरत्वेन न धर्मसिद्धिः, प्रजायते जातु जनस्य पथ्या

९

कामं क्रोधं लोभं मोहं, त्यक्त्वात्मानं पश्य हि कोऽहंम्
आत्मज्ञानविहीना मूढाः, ते पच्यन्ते नरकनिगूढाः ॥

१०

या राका शशिशोभना गतघना सा यामिनी यामिनी
या सौन्दर्यगुणान्विता पतिरता सा कामिनी कामिनी
या गोविन्दरसप्रमोदमधुरा सा माधुरी माधुरी ।
या लोकद्वयसाधनी तनुभृतां सा चातुरी चातुरी ॥

११

दानं दरिद्रस्य प्रभोश्च शान्तिः,
यूनां तपो ज्ञानवताञ्च मौनम् ।
इच्छानिवृत्तिश्च सुखाश्रितानां,
दया च भूतेषु [2]दिवं नयन्ति ॥

१२

त्यज कामार्थयोः सङ्गं, धर्मध्यानं सदा भज ।
छिन्धि स्नेहमयान्, पाशान्मानुष्यं प्राप्य दुर्लभम् ॥ 

१ शान्ति, २ स्वर्गम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१३

धनैश्वर्याभिमानेन, प्रमादमदमोहिताः ।
दुर्लभं प्राप्य मानुष्यं, हारयध्वं मुधैव मा ॥

१४

दुष्प्रापं प्राप्य मानुष्यं, कार्यं तत् किञ्चिदुत्तमैः ।
मुहूर्त्तमेकमप्यस्य, याति नैव यथा वृथा ॥

१५

दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे गर्भवासे नराणां ।
बालत्वे चापि दुःखं मललुलिततनुस्त्रीपयः पानमिश्रम्॥
तारुण्ये चापि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः
संसारे रे मनुष्याः! वदत यदि सुखं स्वल्पमप्यस्ति किंचित्

## स्वार्थ ।

१

वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः ।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं मन्त्रिणः ॥
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः ।
सर्वः कार्यवशाज्जनोऽभिरमते तत्कस्य को वल्लभः ॥

२

नौकां वै भजते तावद्यावत्पारं न गच्छति ।
उत्तीर्णे तु नदीपारे, नौकायाः किं प्रयोजनम् ॥

३

को न याति वशं लोके, मुखे पिण्डेन पूरितः ।
मृदङ्गो मुखलेपेन, करोति मधुरध्वनिम् ॥

४

पुत्रं हि मातापितरौ, त्यजतः पतितं प्रियम् ।
लोको रक्षति चात्मानं, पश्य स्वार्थस्य सारताम् ॥

५

कार्यार्थी भजते लोके, यावत्कार्यं न सिध्यति ।
उत्तीर्णे च परे पारे, नौकायाः किं प्रयोजनम् ॥

६

निर्धनं पुरुषं वेश्या, प्रजा भग्नं नृपं त्यजेत् ।
खगा वीतफलं वृक्षं, भुक्त्वा अभ्यागता गृहम् ॥

७

यावद् वित्तोपार्जनशक्तः, तावत् निजपरिवारो रक्तः ।
तदनु च जरया जर्जरदेहे, वार्त्तां कोऽपि न पृच्छति गेहे ॥

## शौचम् ।

१

अभक्ष्यपरिहारश्च, संसर्गश्चापि निंदितैः ।
आचारेषु व्यवस्थानं, शौचमित्यभिधीयते ॥

२

सत्यं शौचं तपः शौचं, शौचमिन्द्रियनिग्रहः ।
सर्वभूतदया शौचं, जलशौचं च पञ्चमम् ॥

३

मृदो भारसहस्रेण, जलकुम्भशतैरपि ।
न शुद्ध्यन्ति दुराचाराः, स्नातास्तीर्थशतैरपि ॥

४

जायन्ते च म्रियन्ते च, जलेष्वेव जलौकसः ।
न च गच्छन्ति ते स्वर्गं, न विशुद्धमनोमलाः ॥

५

ज्ञानं तीर्थं धृतिस्तीर्थं, दानतीर्थमुदाहृतं ।
तीर्थानामपि यत्तीर्थम्, विशुद्धिर्मनसः परा ॥

६

आत्मानदी संयमतोयपूर्णा, सत्यावहा शीलतटा दयोर्मिः
तत्राभिषेकं कुरु पाण्डुपुत्र, न वारिणा शुध्यति चान्तरात्मा

७

मृत्तिकानां सहस्रेण, चोदकुंभशतेन च ।
न शुद्ध्यन्ति दुरात्मानो, येषां भावो न निर्मलः ॥

८

शौचन्तु द्विविधं प्रोक्तं, बाह्यमाभ्यन्तरं तथा ।
मृज्जलाभ्यां स्मृतं बाह्यं, मनःशुद्धिस्तथान्तरम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

सर्वेषामेव शौचानामन्तः शौचं परं स्मृतम् ।
योऽन्तःशुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः ॥

१०

न शरीरमलत्यागान्नरो भवति निर्मलः ।
मानसे तु मले त्यक्ते, भवत्यन्तः सुनिर्मलः ॥

११

नोदकक्लिन्नगात्रस्तु, स्नात इत्यभिधीयते ।
स स्नातो यो दमस्नातः, स बाह्याभ्यन्तरः शुचिः ॥

१२

मनःशौचं कर्मशौचं, कुलशौचञ्च भारत ।
देहशौचं च वाक्शौचं, शौचं पञ्चविधं स्मृतम् ॥

१३

अन्तर्गतमलो दुष्टस्तीर्थस्नानशतैरपि ।
न शुध्यति यथा भाण्डं, सुराया दाहितं च तत् ॥

१४

तीर्थेषु शुध्यति जलैः शतशोऽपि धौतं,
नान्तर्गतं विविधपापमलावलिप्तं ।
५१ चित्तं विचिन्त्य मनसेति विशुद्धबोधाः,
सम्यक्त्वपूतसलिलैः कुरुताभिषेकं ॥

१५

यच्छुक्रशोणितसमुत्थमनिष्टगंधं,
नानाविधकृमिकुलाकुलितं समंतात् ।
व्याध्यादिदोषमलसद्म विनिन्दनीयं,
तद्वारितः कथमिह च्छति शुद्धिमङ्गम् ॥

१६

गर्भेऽशुचौ कृमिकुलैर्निचिते शरीरं,
यद्वर्धितं मलरसेन नवेह मासान् ।
वर्चोगृहे कृमिरिवातिमलावलिप्ते,
शुद्धिः कथं भवति तस्य जलप्लुतस्य ॥

१७

दुग्धेन शुध्यति मशीवटिका यथा नो,
दुग्धं ह्येति मलिनत्वमिति स्वरूपं ।
नाङ्गं विशुध्यति तथा सलिलेन धौतं,
पानीयमेति नु मलीमसतां समस्तं ॥

१८

मालाम्बराभरणभोजनभामिनीनां,
लोकेतिशायिकमनीयगुणान्वितानां ।
हानिं गुणा झटिति यान्ति यमाश्रितानां,
देहस्य तस्य सलिलेन कथं विशुद्धिः ॥

१९

सम्यक्त्वशीलमनघं जिनवाक्यतीर्थं,
यत्तत्र चारुधिषणाः कुरुताभिषेकं ।
तीर्थाभिषेकवशतो मनसः कदाचि-,
न्नान्तर्गतस्य हि मनागपि शुद्धिसिद्धिः ॥

२०

वाय्वग्निभस्मरविमंत्रधरादिभेदात् ,
शुद्धिं वदन्ति बहुधा भुवि किन्तु पुंसां ।
सुज्ञानशीलसमसंयमशुद्धितोऽन्या,
नो पापलेपशमनी हि विशुद्धिःकाचित् ॥

२१

अभेददर्शनं ज्ञानं, ध्यानं निर्विषयं मनः ।
स्नानं मनोमलत्यागः, शौचमिन्द्रियनिग्रहः ॥

२२

इदं तीर्थमिदं तीर्थं, भ्रमन्ति तामसा जनाः ।
आत्मतीर्थं न जानन्ति, कथं मोक्षः शृणु प्रिये ! ॥

२३

मनो विशुद्धं पुरुषस्य तीर्थं,
वाक्संयमश्चेन्द्रियनिग्रहश्च ।
त्रीण्येव तीर्थानि शरीरभाजां, २१
स्वर्गं च मोक्षं च निदर्शयन्ति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२४

ज्ञानं तीर्थं क्षमा तीर्थं, तीर्थमिन्द्रियनिग्रहः ।
शमस्तीर्थं दया तीर्थं, सत्यं तीर्थमथार्जवम् ॥

२५

दानं तीर्थं दमस्तीर्थं. संतोषस्तीर्थमुच्यते ।
ब्रह्मचर्यं परं तीर्थमहिंसा, तीर्थमुच्यते ॥

२६

ध्यानाम्भसा तु जीवस्य, सदा यच्छुद्धिकारणम् ।
मलं कर्म समाश्रित्य, भावस्नानं तदुच्यते ॥

२७

समता सर्वभूतेषु, मनोवाक्कायनिग्रहः ।
पापध्यानकषायाणां, निग्रहेण शुचिर्भवेत् ॥

२८

वाणी शौचं च मनसः, शौचमिन्द्रियनिग्रहः ।
सर्वभूतदया शौचमेतच्छौचं परार्थिनाम् ॥

२९

न तथा पुष्करे स्नात्वा, गयायां कुरुजाङ्गले ।
मुच्यते पुरुषः पापाद्यथा स्नातः क्षमादिषु ॥

३०

२४ परदार–परद्रव्य–– परद्रोहपराङ्मुखः ।
गङ्गा ब्रूते कदाऽऽगत्य, मामयं पावयिष्यति ॥

३१

शौचमाध्यात्मिकं त्यक्त्वा, भावशुद्ध्यात्मकं शुभम् ।
जलादिशौचं यत्रेदं, मूढविस्मापनं हि यत् ॥

३२

प्रतिसंवत्सरं ग्राह्यं, प्रायश्चित्तं गुरोः पुरः ।
शोध्यमानो भवेदात्मा, येनादर्श इवोज्ज्वलः ॥

---

## धनप्रशंसा ।

१

स्त्रीरूपं मोहकं पुंसो, यून एव भवेत्क्षणम् ।
कनकस्त्री बालवृद्धषण्ढानामपि सर्वदा ॥

२

विभवो हि यथा लोके, न शरीराणि देहिनाम् ।
चाण्डालोऽपि नरः पूज्यो, यस्यास्ति विपुलं धनम् ॥

३

वयोवृद्धास्तपोवृद्धा, ये च वृद्धा बहुश्रुताः ।
सर्वे ते धनवृद्धानां, द्वारि तिष्ठन्ति किङ्कराः ॥

४

यस्यार्थास्तस्य मित्राणि, यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमांल्लोके, यस्यार्थाः स च पण्डितः ॥

५

पूज्यते यदपूज्योपि, यदगम्योपि गम्यते ।
वन्द्यते यदवन्द्योऽपि, स प्रभावो धनस्य च ॥

६

अशनादिन्द्रियाणीव स्युः, कार्याण्यखिलान्यपि ।
एतस्मात्कारणाद्वित्तं, सर्वसाधनमुच्यते ॥

७

ब्रह्मघ्नोपि नरः पूज्यो, यस्यास्ति विपुलं धनं ।
शशिना तुल्यवंशोऽपि, निर्धनः परिभूयते ॥

८

धनं सञ्चय काकुत्स्थ, धनमूलमिदं जगत् ।
अन्तरं नैव पश्यामि, निर्धनस्य मृतस्य च ॥

९

न नरस्य नरो दासो, दासश्चार्थस्य भूपते ।
गौरवं लाघवं वाऽपि, धनाधननिबन्धनम् ॥

१०

अर्थस्य पुरुषो दासो, दासस्त्वर्थो न कस्यचित् ।
अतोऽर्थाय यतेतैव, सर्वदा यत्नमास्थितः ॥

११

धनमाहुः परं धर्मं, धने सर्वं प्रतिष्ठितम् । २५
जीवन्ति धनिनो लोके, मृता ये त्वधना नराः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१२
इह लोके हि धनिनां-, परोऽपि स्वजनायते ।
स्वजनोऽपि दरिद्राणां, सर्वदा दुर्जनायते ॥
१३
अस्ति यावत्त सधनस्तावत्सर्वैस्तु सेव्यते ।
निर्धनस्त्यज्यते भार्यापुत्राद्यैः सगुणोऽप्यतः ॥
१४
धनी भोगान्समाप्नोति, धनी स्वर्गञ्च गच्छति ।
विपुलाञ्च तथा कीर्तिं, गुणाञ्चानाविधानपि ॥
१५
अर्थाद्धर्मश्च कामश्च, स्वर्गश्चैव नराधिप ।
प्राणयात्रापि लोकस्य, विना ह्यर्थं न सिध्यति ॥
१६
अधनं दुर्बलं प्राहुर्धनेन बलवान्भवेत् ।
सर्वं धनवतां प्राप्यं, सर्वं तरति कोशवान् ॥
१७
हेतुप्रमाणयुक्तं, वाक्यं न श्रूयते दरिद्रस्य ।
अप्यर्थात् परुषमसत्यं, पूज्यं वाक्यं समृद्धस्य ॥
१८
२२ शीलं शौचं क्षान्तिर्दाक्षिण्यं मधुरता कुले जन्म ।
न विराजन्ति हि सर्वे, वित्तविहीनस्य पुरुषस्य ॥

१९
अहो नु कष्टं सततं प्रवासं,
ततोऽतिकष्टः परगेहवासः ।
कष्टाधिका नीचजनस्य सेवा,
ततोऽपि कष्टा धनहीनता च ॥
२०
बुभुक्षितैर्व्याकरणं न भुज्यते,
पिपासितैः काव्यरसो न पीयते ।
न छन्दसा कापि समुध्दृतं कुलं,
हिरण्यमेवाश्रय निष्फला गुणाः ॥
२१
यस्यास्ति वित्तं स नरः कुलीनः,
स पण्डितः स श्रुतवान्गुणज्ञः ।
स एव वक्ता स च दर्शनीयः,
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥
२२
त्यजंति मित्राणि धनैर्विहीनं,
पुत्रांश्च दारांश्च सुहृज्जनांश्च ।
तमर्थवन्तं पुनराश्रयन्ति,
ह्यर्थो हि लोके पुरुषस्य बन्धुः ॥

२३
धनैर्निष्कुलीनाः कुलीना भवंति,
धनैरापदं मानवा निस्तरन्ति ।
धनेभ्यः परो बान्धवो नास्ति लोके,
धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥
२४
वरं वनं व्याघ्रगजेन्द्रसेवितं,
द्रुमालयं पत्रफलाम्बुभोजनम् ।
तृणानि शय्या वसनञ्च वल्कलं,
न बन्धुमध्ये धनहीनजीवनम् ॥
२५
पद्मे मूढजने ददासि द्रविणं विद्वत्सु किं मत्सरो ?
नाहं मत्सरिणी न चापि चपला नैवास्ति मूर्खे रतिः ॥
मूर्खेभ्यो द्रविणं ददामि नितरां तत्कारणं श्रूयतां ।
विद्वान्सर्वगुणेषु पूजिततनुर्मूर्खस्य नान्या गतिः ॥
२६
आलस्यं स्थिरतामुपैति भजते चापल्यमुद्योगितां ।
मूकत्वं मितभाषितां वितनुते मौढ्यं भवेदार्जवम् ॥
पात्रापात्रविचारणाविरहिते यच्छत्युदारात्मतां । २२
मातर्लक्ष्मि तव प्रसादवशतो दोषा अमी स्युर्गुणाः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२७

उत्साहसंपन्नमदीर्घसूत्रं,
क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च,
लक्ष्मीः स्वयं याति निवासहेतोः ॥

२८

माता निन्दति नाभिनन्दति पिता, भ्राता न संभाषते ।
भृत्यः कुप्यति नानुगच्छति सुतः, कान्ता च नालिङ्गते ॥
अर्थप्रार्थनशङ्कया न कुरुते, संभाषणं वै सुहृत् ।
तस्माद्द्रव्यमुपार्जयस्व सुमते द्रव्येण सर्वे वशाः ॥

२९

यथा विहङ्गास्तरुमाश्रयन्ति,
नद्यो यथा सागरमाश्रयन्ति ।
यथा तरुण्यः पतिमाश्रयन्ति,
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥

३०

निर्द्रव्यं पुरुषं सदैव विकलं सर्वत्र मन्दादरं ।
तातभ्रातृसुहृज्जनादिकुपितं दृष्ट्वा न संभाषितम् ॥
भार्या रूपवती कुरङ्गनयना स्नेहेन नालिङ्गते ।
तस्माद्द्रव्यमुपार्जयाशु सुमते द्रव्येण सर्वे वशाः ॥

३१

शूरः सुरूपः सुभगश्च वाग्मी,
शस्त्राणि शास्त्राणि विदांकरोति ।
अर्थं विना नैव यशश्च मानं,
प्राप्नोति मर्त्योऽत्र मनुष्यलोके ॥

३२

टका धर्मष्टका कर्म, टका हि परमं पदम् ।
यस्य गृहे टका नास्ति, हा टका टकटकायते ॥

---

## धनदोषाः ।

१

वित्तवान् स्वजनात्तद्वच्चौरेभ्योऽपि च दुर्जनात् ।
राज्यादिभ्योऽपि सततं, मृत्युमाप्नोति दुःखतः ॥

२

वित्तवान् को हि लोकेऽस्मिन्निश्चितः कुत्रचिद्वसेत् ।
अपि स्वप्नेऽपि तस्यास्ति, भयं राजादिजं महत् ॥

३

द्रव्येण जायते कामः, क्रोधो द्रव्येण जायते ।
द्रव्येण जायते लोभो, मोहो द्रव्येण जायते ॥

४

भक्ते द्वेषो जडे प्रीतिररुचिर्गुरुलङ्घनम् ।
मुखे च कटुता नित्यं, धनिनां ज्वरिणामिव ॥

५

जनयन्त्यर्जने दुःखं, तापयन्ति विपत्तिषु ।
मोहयन्ति च सम्पत्तौ, कथमर्थाः सुखावहाः ॥

६

मातरं पितरं पुत्रान्ब्राह्मणांश्च बहुश्रुतान् ।
कर्मणा मनसा वाचा, समर्थो हन्ति मोहतः ॥

७

मृत्युः शरीरगोप्तारं, वसुरक्षं वसुन्धरा ।
दुश्चारिणी च हसति, स्वपतिं पुत्रवत्सलम् ॥

८

अर्थार्थी जीवलोकोऽयं, श्मशानमपि सेवते ।
जनितारमपि त्यक्त्वा, निःस्वं गच्छति दूरतः ॥

९

वरं हालाहलं पीतं, सद्यः प्राणहरं विषम् ।
न द्रष्टव्यं धनाढ्यस्य, भ्रूभङ्गकुटिलं मुखम् ॥

१०

राजतः सलिलादग्नेश्चोरतः स्वजनादपि ।
भयमर्थवतां नित्यं, मृत्योः प्राणभृतामिव ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

११

अर्थस्योपार्जने दुःखमर्जितस्यापि रक्षणे ।
नाशे दुःखं व्यये दुःखं धिगर्थं दुःखभाजनम् ॥

१२

अविश्वासनिधानाय, महापातकहेतवे ।
पितृपुत्रविरोधाय, हिरण्याय नमोस्तु ते ॥

१३

वरमसिधारा तरुतलवासो,
वरमिह भिक्षा वरमुपवासः ।
वरमपि घोरे नरके पतनं,
न च धनगर्वितबान्धवशरणम् ॥

१४

गुणिनं जनमालोक्य, निजबन्धनशङ्कया ।
राजलक्ष्मी कुरङ्गीव, दूरं दूरं पलायते ॥

१५

हे लक्ष्मि क्षणिके स्वभावचपले मूढे च पापेऽधमे ।
न त्वं चोत्तमपात्रमिच्छसि खले प्रायेण दुश्चारिणि ॥
५० ये देवार्चनसत्यशौचनिरता ये चापि धर्मे रता-
स्तेभ्यो लज्जसि निर्दये गतमतिर्नीचो जनो वल्लभः ॥

१६

नाऽहं दुश्चरिणी न चापि चपला मूर्खो न मे रोचते ।
नो शूरो न च पण्डितो न च शठो हीनाक्षरो नैव च ॥
पूर्वस्मिन्कृतपुण्ययोगविभवो भुक्तं स मे सत्फलं ।
लोकानां किमसज्ञता सखि पुनर्द्रष्टुं परां संपदम् ॥

१७

यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।
आकाशे पक्षिभिश्चैव, तथा सर्वत्र वित्तवान् ॥

१८

प्रायश्चित्ते राजदण्डे, वेश्यानृत्ये च भारत ।
मद्यद्यूतपरस्त्रीषु, धनं गच्छति पापिनाम् ॥

१९

राजा रोचति किंतु मे हुतवहो दग्धा किमेतद्धनं ।
किं वामी प्रभविष्णवः कृतनिभं लास्यंत्यदो गोत्रिकाः॥
मोषिष्यन्ति च दस्यवः किमु तथा नष्टा निखातं भुवि ।
ध्यायन्नेवमहर्निशं धनयुतोप्यास्तेतरां दुःखितः ॥

## दरिद्र

१

उत्थाय हृदि लीयन्ते, दरिद्राणां मनोरथाः ।
बालवैधव्यदग्धानां, कुलस्त्रीणां कुचा इव ॥

२

हे दारिद्य नमस्तुभ्यं, सिद्धोऽहं त्वत्प्रसादतः ।
पश्याम्यहं जगत्सर्वं, न मां पश्यति कश्चन ॥

३

किं करोमि क्व गच्छामि, कमुपैमि दुरात्मना ।
दुर्भरेणोदरेणाहं, प्राणैरपि विडम्बितः ॥

४

दुःखं दुःखमिति ब्रूयान्मानवो नरकं प्रति ।
दारिद्याद्धिकं दुःखं, न भूतं न भविष्यति ॥

५

धर्मार्थकामहीनस्य, परकीयान्नभोजिनः ।
काकस्येव दरिद्रस्य, दीर्घमायुर्विडम्बना ॥

६

अपुत्रस्य गृहं शून्यं, दिशः शून्यास्त्वबान्धवाः ।
मूर्खस्य हृदयं शून्यं, सर्वशून्या दरिद्रता ॥

७

घृतं न श्रूयते कर्णौ, दधि स्वप्ने न दृश्यते ।
मुग्धे दुग्धस्य का वार्ता, तक्रं शक्रस्य दुर्लभम् ॥

८

शक्तिं करोति संचारे, शीतोष्णे मर्षयत्यपि । ५७
दीपयत्युदरे वह्निं, दारिद्र्यं परमौषधम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

ऐश्वर्यतिमिरं चक्षुः, पश्यन्नपि न पश्यति ।
तस्य निर्मलतायां तु, दारिद्र्यं परमौषधम् ॥

१०

खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके ।
वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः ॥
तत्राप्येकफलेन मूर्ध्नि पतता भग्नं सशब्दं शिरः ।
प्रायो गच्छति यत्र भाग्यरहितस्तत्रापि यान्त्यापदः ॥

११

चाण्डालश्च दरिद्रश्च, द्वावेतौ सदृशाविह ।
चाण्डालस्य न गृह्णन्ति, दरिद्रो न प्रयच्छति ॥

१२

सर्वे सहायाः सबले, भवन्ति न तु निर्बले ।
वह्निं प्रदीपयन्वायुः, प्रदीपं शमयत्यरम् ॥

---

## कृपण ।

१

यस्य किंचिन्न दातव्यं, तस्य देयं किमुत्तरं ।
अद्य सायं पुनः प्रातः, सायं प्रातः पुनः पुनः ॥

२

अन्नं नास्त्युदकं नास्ति, नास्ति ताम्बूलचर्वणम् ।
मन्दिरेषु महोत्साहः, शुष्कचर्मस्य ताडनम् ॥

३

अयं पटो मे पितुराद्यभूषणः,
पितामहाद्यैरपि भुक्तयौवनः ।
मत्पुत्रपौत्रान्समलंकरिष्य-
त्यतो मया कक्षपुटेन धार्यते ॥

४

नमस्कारसहस्रेषु, शाकपत्रं न लभ्यते ।
आशीर्वादसहस्रेषु, रोमवृद्धिर्न जायते ॥

५

कृपणेन समो दाता, न भूतो न भविष्यति ।
अस्पृशन्नेव वित्तानि, यः परेभ्यः प्रयच्छति ॥

६

यदर्ज्यते परिक्लेशैरर्जितं यन्न भुज्यते ।
विभज्यते यदन्तेऽन्यैः, कस्यचिन्मास्तु तद्धनम् ॥

७

दानोपभोगरहिता दिवसा यस्य यान्ति वै ।
स लोहकारभस्त्रेव, श्वसन्नपि न जीवति ॥

८

शरणं किं प्रपन्नानि, विषवन्मारयन्ति किम् ।
न त्यज्यन्ते न भुज्यन्ते, कृपणेन धनानि यत् ॥

९

अतिसञ्चयकर्तॄणां, वित्तमन्यस्य कारणम् ।
अन्यैः संचीयते यत्नादन्यैश्च मधु पीयते ॥

१०

उपभोगकातराणां, पुरुषाणामर्थसञ्चयपराणाम् ।
कन्यामणिरिव सदने, तिष्ठत्यर्थः परस्यार्थे ॥

११

प्राप्तानपि न लभन्ते,
भोगान्भोक्तुं स्वकर्मभिः कृपणाः ।
[१]मुखपाकः किल भवति,
द्राक्षापाके [२]बलिभुजां हि ॥

१२

अदातरि समृद्धोऽपि किं कुर्वन्त्युपजीविनः ।
किंशुके किं शुकः कुर्यात् फलितेऽपि बुभुक्षितः ॥

---

१ मुखरोग २ काकानाम्



For Private And Personal Use Only

## याचक।

१

वेपथुर्मलिनं वक्त्रं, दीना वाग्गद्गदः स्वरः ।
मरणे यानि चिह्नानि तानि चिह्नानि याचके ॥

२

गतेर्भङ्गः स्वरो हीनो, गात्रे स्वेदो महद्भयम् ।
मरणे यानि चिह्नानि, तानि चिह्नानि याचके ॥

३

अनाहूताः स्वयं यान्ति, रसास्वादविलोलुपाः ।
निवारिता न गच्छन्ति, मक्षिका इव भिक्षुकाः ॥

४

तीक्ष्णधारेण खड्गेन, वरं जिह्वा द्विधाकृता ।
न तु मानं परित्यज्य, देहि देहीति भाषितम् ॥

५

एकेन तिष्ठताऽधस्तादन्येनोपरि तिष्ठता ।
दातृयाचकयोर्भेदः कराभ्यामेव सूचितः ॥

६

काक आह्वयते काकान् ,याचको न तु याचकान् ।
काकयाचकयोर्मध्ये, वरं काको न याचकः ॥

७

साधुरेवार्थिभिर्याच्यः, क्षीणवित्तोऽपि सर्वदा ।
शुष्कोऽपि हि नदीमार्गः, खन्यते सलिलार्थिभिः ॥

८

लक्ष्मीर्वसति वाणिज्ये, तदर्धं कृषिकर्मणि ।
तदर्धं राजसेवायां, भिक्षायां नैव नैव हि ॥

९

द्वारे द्वारे परेषामविरलमटति द्वारपालैः करालैः ।
दृष्टोयोऽप्याहतः सन् रणति गणयति स्वापमानन्तु नैव॥
क्षन्तुं शक्नोति नान्यं स्वसदृशमितरागारमप्याश्रयन्तं।
श्राम्यत्यात्मोदरार्थे कथमहह शुना नो समो याचकःस्यात्

१०

भिक्षुका नैव भिक्षंते, बोधयन्ति गृहे गृहे ।
दीयतां दीयतां नित्यमदातुः फलमीदृशम् ॥

११

द्वारं द्वारं रटन्तो, भिक्षुकाः पात्रपाणयः ।
दर्शयन्त्येव लोकानामदातुः फलमीदृशम् ॥

---

## नौकर।

१

स्वाभिप्रायपरोक्षस्य, परचित्तानुवर्तिनः ।
स्वयं विक्रीतदेहस्य, सेवकस्य कुतः सुखम् ॥

२

वरं वनं वरं भैक्ष्यं, वरं भारोपजीवनम् ।
पुंसां विवेकहीनानां, सेवया न धनार्जनम् ॥

३

तावज्जन्माति दुःखाय, ततो दुर्गतता सदा ।
तत्रापि सेवया वृत्तिरहो दुःखपरम्परा ॥

४

एहि गच्छ पतोत्तिष्ठ, वद मौनं समाचर ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥

५

सेवया धनमिच्छद्भिः, सेवकैः पश्य किं कृतम् ।
यत्स्वातन्त्र्यं शरीरस्य, मूढैस्तदपि हारितम् ॥

६

मौनान्मूको भाषणाच्च, धूर्तो वा जल्पकस्तथा ।
पार्श्ववर्ती च धृष्टः स्यादप्रगल्भश्च दूरतः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७

क्षान्त्या भीरुः कोपयुक्तो मूर्खसेवक उच्यते ।
रूपवांश्च भवेज्जारः, सेवाधर्मोऽति दुर्गमः ।

८

सेवा श्ववृत्तिर्यैरुक्ता, न तैः सम्यगुदाहृतम् ।
स्वच्छन्दचारी कुत्र श्वा, विक्रीतासुः क्व सेवकः ॥

९

भूशय्या ब्रह्मचर्यं च, कृशत्वं लघुभोजनम् ।
सेवकस्य यतेर्यद्वद्विशेषः पापधर्मजः ॥

१०

मृदुनाऽति सुवृत्तेन, सुमृष्टेनातिहारिणा ।
मोदकेनापि किं तेन, निष्पत्तिर्यस्य सेवया ॥

११

जीवन्तोऽपि मृताः पञ्च, व्यासेन परिकीर्तिताः ।
दरिद्रो व्याधितो मूर्खः, प्रवासी नीचसेवकः ॥

१२

चलेषु स्वामिचित्तेषु, सुलभे पिशुने जने ।
यदि जीवन्त्यहो चित्रं, क्षणमप्युपजीविनः ॥

१३

शीतातपादिकष्टानि, सहते यानि सेवकः ।
धनायत्तानि चाल्पानि यदि धर्माय मुच्यते ॥

१४

आहारे वडवानलश्च शयने यः कुम्भकर्णायते ।
संदेशे बधिरः पलायनविधौ सिंहः शृगालो रणे ॥
अन्धो वस्तुनिरीक्षणेऽथ गमने खञ्जः पटुः क्रन्दने ।
भाग्येनैव हि लभ्यते पुनरसौ सर्वोत्तमः सेवकः ॥

## मित्रलक्षणम् ।

१

पापान्निवारयति योजयते हिताय,
गुह्यं च गूहति गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले,
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥

२

शुचित्वं त्यागिता शौर्यं, सामान्यं सुखदुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च, सत्यता च सुहृद्गुणाः ॥

३

उत्सवे व्यसने चैव, दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च, यस्तिष्ठति स बान्धवः ॥

४

दर्शने स्पर्शने वापि, श्रवणे भाषणेऽपि वा ।
यत्र द्रवत्यन्तरङ्गं, स स्नेह इति कथ्यते ॥

५

विवादो धनसम्बन्धो, याचनं स्त्रीषु संगतिः ।
अदानमग्रतः स्थानं, मैत्रीभङ्गस्य हेतवः ॥

६

दर्शितानि कलत्राणि, गृहे भुक्तमशङ्कितम् ।
कथितानि रहस्यानि, सौहृदं किमतः परम् ॥

७

ददाति प्रतिगृह्णाति, गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव, षड्विधं प्रीतिलक्षणम् ॥

८

सद्भावेन जयेन्मित्रं, सद्भावेन च बान्धवान् ।
स्त्रीभृत्यान्दानमानाभ्यां, दाक्षिण्येनेतरं जनम् ॥

९

भिन्ने चित्ते कुतः प्रीतिः, स्याद्वा प्रीतिः कुतः सुखम् ।
त्वं च स्मरसि तं पुत्रं, पुच्छच्छेदं स्माराम्यहम् ॥

१०

कराविव शरीरस्य, नेत्रयोरिव पक्ष्मणी ।
अविचार्य प्रियं कुर्यात्तन्मित्रं मित्रमुच्यते ॥

११

न मातरि न दारेषु, न सोदर्ये न चात्मनि ।
विश्वासस्तादृशः पुंसां, यादृङ्मित्रे स्वभावजे ॥

६०

For Private And Personal Use Only

१२

व्यसनितस्यार्थहीनस्य, देशान्तरगतस्य च ।
नरस्य शोकदग्धस्य, सुहृद्दर्शनमौषधम् ॥

१३

शोकारातिभयत्राणं, प्रीतिविश्रम्भभाजनम् ।
केन रत्नमिदं सृष्टं, मित्रमित्यक्षरद्वयम् ॥

१४

धृतिः शमो दमः शौचं, कारुण्यं वाग् निष्ठुरा ।
मित्राणाञ्चानभिद्रोहः, सप्तैताः समिधः श्रियः ॥

१५

शीलं शौर्यमनालस्यं, पाण्डित्यं मित्रसंग्रहः ।
अचोरहरणीयानि, पञ्चैतान्यक्षयो निधिः ॥

१६

आर्तिरार्ते प्रिये प्रीतिरेतावन्मित्रलक्षणम् ।
विपरीतन्तु बोद्धव्यमरिलक्षणमेव तत् ॥

१७

सुहृदां हितकामानां, यः शृणोति न भाषितम् ।
विपत्संनिहिता तस्य, स नरः शत्रुनन्दनः ॥

१८

यदीच्छेद्विपुलां मैत्रीं, तत्र त्रीणि न कारयेत् ।
विवादमर्थसम्बन्धं, परोक्षे दारभाषणम् ॥

१९

परोक्षे कार्यहन्तारं, प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं, विषकुम्भं पयोमुखम् ॥

२०

मित्रद्रोही कृतघ्नश्च, यश्च विश्वासघातकः ।
ते नरा नरकं यान्ति, यावच्चन्द्रदिवाकरौ ॥

२१

विद्या शौर्यंच दाक्ष्यं च, बलं धैर्यं च पञ्चमम् ।
मित्राणि सहजान्याहुर्वर्तयन्ति हितैर्बुधाः ॥

२२

मृगा मृगैः सङ्गमनुव्रजन्ति,
गावश्चगोभिस्तुरगास्तुरङ्गैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः,
समानशीलव्यसनेषु सख्यम् ॥

२३

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः।
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ॥
गन्तुं पावकमुन्मनस्तदभवत् दृष्ट्वा तु मित्रापदं ।
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥

२४

अवृत्तिकं त्यजेद्देशं, वृत्तिं सोपद्रवां त्यजेत् ।
त्यजेन्मायाविनं मित्रं, धनं प्राणहरं त्यजेत् ॥

२५

दूरस्थोपि समीपस्थो, यो यस्य हृदि वर्तते ।
यो यस्य हृदये नास्ति, समीपस्थोऽपि दूरगः ॥

२६

अहो साहजिकं प्रेम, दूरादपि विराजते ।
चकोरनयनद्वन्द्वमाह्लादयति चन्द्रमाः ॥

२७

सख्योः सोदर्ययोर्भ्रात्रो-र्दम्पत्योर्वा परस्परम् ।
कस्यचिन्नाभिजानामि, प्रीतिं निष्कारणामिह ॥

२८

न विश्वसेत्कुमित्रे च, मित्रे चापि न विश्वसेत् ।
कदाचित्कुपितं मित्रं, सर्वं गुह्यं प्रकाशयेत् ॥

२९

किं चन्दनैः सकर्पूरैस्तुहिनैः किं शीतलैः ।
सर्वे ते मित्रगात्रस्य, कलां नार्हन्ति षोडशीम् ॥

३०

केनामृतमिदं सृष्टं, मित्रमित्यक्षरद्वयम् ।
आपदाञ्च परित्राणं, शोकसन्तापभेषजम् ॥

६१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३१

आपत्काले तु सम्प्राप्ते, यन्मित्रं मित्रमेव तत् ।
वृद्धिकाले तु सम्प्राप्ते, दुर्जनोऽपि सुहृद् भवेत् ॥

३२

रहस्यभेदो याञ्चा च, नैष्ठुर्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ॥

३३

मुखं प्रसन्नं विमला च दृष्टिः,
कथानुरागो मधुरा च वाणी ।
स्नेहोऽधिकं सम्भ्रमदर्शनञ्च,
सदानुरक्तस्य जनस्य लक्षणम् ॥

---

## पुत्रवर्णनम्

१

मातरं पितरं चैव, साक्षात्प्रत्यक्षदेवताम् ।
मत्वा गृही निषेवेत, सदा सर्वप्रयत्नतः ॥

२

श्रावयेन्मृदुलां वाणीं, सर्वदा प्रियमाचरेत् ।
पित्रोराज्ञानुसारी स्यात्, स पुत्रः कुलपावनः ॥

३

यं मातापितरौ क्लेशं, सहेते संभवे नृणाम् ।
न तस्य निष्कृतिः शक्या, कर्तुं वर्षशतैरपि ॥

४

एकोऽपि गुणवान् पुत्रो, निर्गुणैः किं शतेन तैः ।
एकश्चन्द्रो जगच्चक्षुर्नक्षत्रैः किं प्रयोजनम् ॥

५

एकेनापि सुपुत्रेण सिंही स्वपिति निर्भया ।
गर्दभी दशपुत्रैश्च, भारं वहति सर्वदा ॥

६

आस्तन्यपानाज्जननी पशूना-
मादारलाभावधि चाधमानाम् ।
आगेहकर्मावधि मध्यमाना-
माजीवितात्तीर्थमिवोत्तमानाम् ।

७

पिता गुरुः पिता देवः, पिता धर्मः सनातनः ।
तुष्टे पितरि पुत्राणां, तुष्टाः स्युः सर्वदेवताः ॥

८

जनिता चोपनेता च, यश्च विद्याप्रदायकः ।
अन्नदाता भयत्राता, पञ्चैते पितरः स्मृताः ॥

९

शर्वरीदीपकश्चन्द्रः, प्रभाते दीपको रविः ।
त्रैलोक्यदीपको धर्मः, सत्पुत्रः कुलदीपकः ॥

१०

पितृभिस्ताडितः पुत्रः, शिष्यस्तु गुरुशिक्षितः ।
घनाहतं सुवर्णं च, जायते जनमण्डनम् ॥

११

सुपुत्रो यः पितुर्मातुर्भूरिभक्तिसुधारसैः ।
निर्वापयति संतापं, शेषास्तु कृमिकीटकाः ॥

१२

एकेन राजहंसेन, या शोभा सरसो भवेत् ।
न सा बकसहस्रेण, परितस्तीरवासिना ॥

१३

हंसः श्वेतो बकः श्वेतः, को भेदो बकहंसयोः ।
नीरक्षीरविभागे तु, हंसो हंसो बको बकः ॥

१४

काकः कृष्णः पिकः कृष्णः, को भेदः पिककाकयोः ।
वसन्तसमये प्राप्ते, काकः काकः पिकः पिकः ॥

१५

जननी जन्मभूमिश्च, जाह्नवी च जनार्दनः ।
जनकः पञ्चमश्चैव, जकाराः पञ्च दुर्लभाः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१६

उत्तमा आत्मनाख्याताः, पितुः ख्यातास्च मध्यमाः ।
अधमा मातुलात्ख्याताः, श्वशुराच्चाधमाधमाः ॥

१७

दाने तपसि शौर्ये च, यस्य न प्रथितं यशः ।
विद्यायामर्थलाभे च, मातुरुच्चार एव सः ॥

१८

धर्मार्थकाममोक्षाणां, यस्यैकोऽपि न विद्यते ।
अजागलस्तनस्येव, तस्य जन्म निरर्थकम् ॥

१९

स जातो येन जातेन, याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे, मृतः को वा न जायते ॥

२०

एकेनापि सुपुत्रेण, विद्यायुक्तेन भासते ।
कुलं पुरुषसिंहेन, चन्द्रेणेव हि शर्वरी ॥

२१

पुण्यस्थाने कृतं येन, तपः क्वाप्यति दुष्करम् ।
तस्य पुत्रो भवेद्वश्यः, समृद्धो धार्मिकः सुधीः ॥

२२

निरुत्साहं निरानन्दं, निर्वीर्यमरिनन्दनम् ।
मा स्म सीमन्तिनी काचिज्जनयेत्पुत्रमीदृशम् ॥

२३

अजातमृतमूर्खाणां, वरमाद्यौ न चान्तिमः ।
सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥

२४

धिग्गृहं गृहिणीशून्यं, धिक्कलत्रमपुत्रकम् ।
धिक्पुत्रमविनीतं च, धिग्ज्योतिषमजातकम् ॥

२५

एकेनापि सुपुत्रेण, जायमानेन सत्कुलम् ।
शशिना चेव गगनं सर्वदैवोज्ज्वलीकृतम् ॥

२६

एकेनापि सुवृक्षेण, पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्वं, सुपुत्रेण कुलं यथा ॥

२७

दुर्बलार्थं बलं यस्य, धर्मार्थश्च परिग्रहः ।
वाक् सत्यवचनार्था च, पिता तेनैव पुत्रवान् ॥

२८

मृष्टं किं सुतवचनं, मृष्टतरं किं तदेव सुतवचनम् ।
मृष्टान्मृष्टतमं किं श्रुतिपरिपक्वं तदेव सुतवचनम् ॥

२९

अविनीतः सुतो जातः, कथं न दहनात्मकः ।
विनीतस्तु सुतो जातः, कथं न पुरुषोत्तमः ॥

३०

यदि पुत्रः कुपुत्रः स्याद्व्यर्थो हि धनसञ्चयः ।
यदि पुत्रः सुपुत्रः स्याद्व्यर्थो हि धनसञ्चयः ॥

३१

एकेन शुष्कवृक्षेण, दह्यमानेन वह्निना ।
दह्यते तद्वनं सर्वं, कुपुत्रेण कुलं यथा ॥

---

## विनय

१

नमन्ति फलिता वृक्षाः, नमन्ति विबुधा जनाः ।
शुष्ककाष्ठं च मूर्खाश्च, भज्यन्ते न नमन्ति च ॥

२

नभोभूषा पूषा कमलवनभूषा मधुकरो ।
वचोभूषा सत्यं वरविभवभूषा वितरणम् ॥
मनोभूषा मैत्री मधुसमयभूषा मनसिजः ।
सदो[1] भूषा सूक्तिः सकलगुणभूषा च विनयः ॥

३

संभ्रमः स्नेहमाख्याति, वपुराख्याति भोजनम् ।
विनयो वंशमाख्याति, देशमाख्याति भाषितम् ॥

---

१ सभा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

४

विद्याविनयोपेतो,
हरति न चेतांसि कस्य मनुजस्य ।
काञ्चनमणिसंयोगो,
नो जनयति कस्य लोचनानन्दम् ॥

५

छायां प्रकुर्वन्ति नमन्ति पुष्पैः,
फलानि यच्छंति तटद्रुमा ये ।
उन्मूल्य तानेव नदी प्रयाति,
तरङ्गिणां क प्रतिपन्नमस्ति ॥

६

विपत्तिष्वव्यथो दक्षो, नित्यमुत्थानवान्नरः ।
अप्रमत्तो विनीतात्मा, नित्यं भद्राणि पश्यति ॥

७

आकारैरिङ्गितैर्गत्या, चेष्टया भाषितेन च ।
नेत्रवक्त्रविकारैश्च, गृह्यतेऽन्तर्गतं मनः ॥

८

आकारैरेव चतुरास्तर्कयन्ति परेङ्गितम् ।
गर्भस्थं केतकीपुष्पमामोदेनेव षट्पदाः ॥



९

विनयेन विहीनस्य, व्रतशीलपुरःसराः ।
निष्फलाः सन्ति निःशेषा, गुणा गुणवतां मताः ॥

१०

विनश्यन्ति समस्तानि, व्रतानि विनयं विना ।
सरोरुहाणि तिष्ठन्ति, सलिलेन विना कुतः ॥

११

विनयः कारणं मुक्तेर्विनयः कारणं श्रियः ।
विनयः कारणं प्रीते—र्विनयः कारणं मतेः ॥

१२

का संपदविनीतस्य, का मैत्री चलचेतसः ।
का तपस्या विशीलस्य, का कीर्तिः कोपवर्तिनः ॥

१३

श्रुतशीलमूलनिकषो, विनीतविनयो यथा नरो भाति ।
न तथा सुमहार्घैरपि, वस्त्राभरणैरलङ्कृतो भाति ॥

१४

विनयायत्ताश्च गुणाः सर्वे विनयश्च मार्दवायत्तः ।
यस्मिन्मार्दवमखिलं, स सर्वगुणभाक्त्वमाप्नोति ॥

१५

आत्मानं भावयेन्नित्यं, ज्ञानेन विनयेन च ।
मा पुनर्म्रियमाणस्य, पश्चात्तापो भविष्यति ॥

१६

यथा नमन्ति पाथोभिः, पाथोदाः[1] फलदाः[2] फलैः ।
नमन्ति विनयेनैव, तद्वदुत्तमपूरुषाः ॥

१७

"विनयफलं शुश्रूषा, गुरुशुश्रूषाफलं श्रुतज्ञानम् ।
ज्ञानस्य फलं विरति-र्विरतिफलं चाश्रवनिरोधः ॥

१८

संवरफलं तपोबलमथ, तपसो निर्जराफलं दृष्टम् ।
तस्मात् क्रियानिवृत्तिः, क्रियानिवृत्तेरयोगित्वम् ॥

१९

योगनिरोधाद्भवसंततिक्षयः सन्ततिक्षयान्मोक्षः ।
तस्मात्कल्याणानां, सर्वेषां भाजनं विनयः" ॥

२०

सुसुता रूपसंपन्ना, यौवनाभिमुखा यथा ।
दत्ता षंढाय विफला, तथेयं दुर्धिये सदा ॥

२१

कुराजराज्येन कुतः प्रजासुखं,
कुमित्रमित्रेण कुतोऽभिनिर्वृत्तिः ।

---

१ बादल २ वृक्ष



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुदारदारैश्च कुतो गृहे रतिः,
कुशिष्यमध्यापयतः कुतो यशः ॥

२२

शरीरं चैव वाचं च बुद्धीन्द्रियमनांसि च ।
नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम् ॥

२३

नीचं शय्यासनं चास्य सर्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ॥

---

## ऐक्यम्

१

यत्रात्मीयो जनो नास्ति, भेदस्तत्र न विद्यते ।
कुठारैर्दण्डनिर्मुक्तैर्भिद्यन्ते तरवः कथम् ॥

२

अल्पानामपि वस्तूनां, संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥

३

संहतिः श्रेयसी पुंसां, स्वकुलैरल्पकैरपि ।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥

४

बहूनां चैव सत्वानां, समवायो रिपुञ्जयः ।
वर्षधाराधरो मेघस्तृणैरपि निवार्यते ॥

५

अन्योन्यैक्यप्रभावेन, पाण्डवानां जयः किल ।
विनष्टाः कौरवाः सर्वे, तदभावान्न संशयः ॥

६

भूमिजलाग्निवायूनामणवो मिलिता यदि ।
साधयन्ति स्वकं कार्यं, न भिन्नाः कार्यसाधकाः ॥

७

एकस्मिन्यत्तिरिणि काके, यदा विज्ञायते विपत् ।
ते काका मिलिताः सन्तो, यतन्ते तन्निवृत्तये ॥

८

वानराणां यथा दृष्टा, ह्यन्योन्यस्य सहायता ।
मनुष्यैरपि कर्तव्या, न विरोधः कदाचन ॥

९

महानप्येकजो वृक्षो, बलवान्सुप्रतिष्ठितः ।
प्रसह्य एव वातेन, शक्यो धर्षयितुं क्षणात् ॥

१०

पञ्चभिः सह गन्तव्यं, स्थातव्यं पञ्चभिः सह ।
पञ्चभिः सह वक्तव्यं,, न दुःखं पञ्चभिः सह ॥

११

कुलीनैः सह सम्पर्कं, पण्डितैः सह मित्रताम् ।
ज्ञातिभिश्च समं मेलं, कुर्वाणो नावसीदति ॥

१२

संभोजनं संकथनं, संप्रीतिश्च परस्परम् ।
ज्ञातिभिः सह यानि, न विरोधः कदाचन ॥

१३

कुठारमालिकां दृष्ट्वा कम्पिताः सकला द्रुमाः ॥
वृद्धस्तरुरुवाचेदं, स्वजातिर्नैव दृश्यते ॥

१४

न वै भिन्ना जातु चरन्ति धर्मं ।
न वै सुखं प्राप्नुवन्तीह भिन्नाः ॥
न वै भिन्नाः गौरवं प्राप्नुवन्ति ।
न वै भिन्नाः प्रशमं रोचयन्ति ॥

१५

असहायः पुमानेकः, कार्यान्तं नाधिगच्छति ।
तुषेणापि विनिर्मुक्तस्तण्डुलो न प्ररोहति ॥

१६

वहवो न विरोद्धव्या दुर्जयास्तेऽपि दुर्बलाः ।
स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः ॥




For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## कलियुग

१

लक्ष्मीः लक्षणहीनेषु, कुलहीने सरस्वती ।
कुपात्रे रमते नारी, गिरौ वर्षति माधवः ॥

२

दाता दरिद्री कृपणो धनाढ्यः,
पापी चिरायुः सुकृतिर्गतायुः ।
कुले च दास्यं अकुले च राज्यं,
कलौ युगे षड्गुणमावहन्ति ॥

३

सीदन्ति सन्तो विलसन्त्यसन्तः,
पुत्रा म्रियन्ते जनकश्चिरायुः ।
परेषु मैत्री स्वजनेषु वैरं,
पश्यन्तु लोकाः कलिकौतुकानि ॥

४

पराह्नेन मुखं दग्धं, हस्तौ दग्धं प्रतिग्रहात् ।
परस्त्रीभिर्मनो दग्धं, कुतः शापः कलौ युगे ॥

५

वागुच्चारोत्सवं मात्रं, तत्क्रियां कर्तुमक्षमाः ।
कलौ वेदान्तिनो भान्ति, फाल्गुने बालका इव ॥

६

न देवे देवत्वं कपटपटवस्तापसजना ।
जनो मिथ्यावादी विरलतरवृष्टिर्जलधरः ॥
प्रसङ्गो नीचानामवनिपतयो दुष्टमनसो ।
जना भ्रष्टा नष्टा अहह कलिकालः प्रभवति ॥

७

निर्वीर्या पृथिवी निरोषधिरसा नीचा महत्वं गता ।
भूपाला निजकर्मधर्मरहिता विप्राः कुमार्गे रताः ॥
भार्या भर्तृविरोधिनी पररता पुत्राः पितुर्द्वेषिणो ।
हा कष्टं खलु वर्तते कलियुगे धन्या नरा ये मृताः ॥

८

धर्मः प्रव्रजितस्तपः प्रचलितं सत्यं च दूरे गतम् ।
पृथ्वी मंदफला नराः कपटिनश्चितं च शाठ्योर्जितम् ॥
राजानोऽर्थपरा न रक्षणपराः पुत्राः पितुर्द्वेषिणः ।
साधुः सीदति दुर्जनः प्रभवति प्राप्ते कलौ दुर्युगे ॥

९

सन्तः क्वापि न सन्ति सन्ति यदि वा दुःखेन जीवन्ति ते
विद्वांसोऽपि न सन्ति सन्ति यदि वा मात्सर्ययुक्ताश्च ते ॥
राजानोऽपि न सन्ति सन्ति यदि वा लोभाद्धनं ग्राहिणो ।
दातारोऽपि न सन्ति सन्ति यदि वा सेवानुकूलाः कलौ ॥

१०

गुणवानपि चिरजीवी, सधनो विनतः सती विदग्धा स्त्री ।
हरिभक्तोऽपि धनाढ्यः क्षमातले न श्रुतं न वा दृष्टम् ॥

११

हृदयं सदयं यस्य भाषितं सत्यभूषितम् ।
कायः परहितोपायः कलिः कुर्वीत तस्य किम् ॥

---

## उद्यम

१

उद्योगः खलु कर्त्तव्यः, फलं मार्जारवद्भवेत् ।
जन्मप्रभृति गौर्नास्ति, पयः पिबति नित्यशः ॥

२

उद्यमं साहसं धैर्यं, बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तंते तत्र देवः सहायकृत् ॥

३

न दैवमिति संचिन्त्य, त्यजेदुद्योगमात्मनः ।
अनुद्यमेन कस्तैलं, तिलेभ्यः प्राप्तुमर्हति ॥

४

उद्यमेन हि सिध्यन्ति, कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य, प्रविशन्ति मुखे मृगाः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

५

वीरः सुधीः सुविद्यश्च, पुरुषः पुरुषार्थवान् ।
तदन्ये पुरुषाकाराः, पशवः पुच्छवर्जिताः ॥

६

सिंहाः सत्पुरुषाश्चैव, निजदर्पोपजीविनः ।
पराश्रयेण जीवन्ति, कातराः शिशवः स्त्रियः ॥

७

आलस्यं हि मनुष्याणां, शरीरस्थो महारिपुः ।
नास्त्युद्यमसमो बन्धुः, कृत्वा यं नावसीदति ॥

८

अलसस्य कुतो विद्या, ह्यविद्यस्य कुतो धनम् ।
अधनस्य कुतो मित्रममित्रस्य कुतः सुखम् ॥

९

न कश्चिदपि जानाति, किं कस्य श्वो भविष्यति ।
अतः श्वः करणीयानि, कुर्यादद्यैव बुद्धिमान् ।

१०

शरीरनिरपेक्षस्य, दक्षस्य व्यवसायिनः ।
बुद्धिप्रारब्धकार्यस्य, नास्ति किञ्चन दुष्करम् ॥

११

विद्या वितर्को विज्ञानं, स्मृतिस्तत्परता क्रिया ।
यस्यैते षड् गुणास्तस्य, न साध्यमतिवर्तते ॥

१२

यत्रोत्साहसमारम्भो, यत्रालस्यविहीनता ।
नयविक्रमसंयोगस्तत्र श्रीरचला ध्रुवम् ॥

१३

उत्साहो बलवानार्य, नास्त्युत्साहात्परं बलम् ।
सोत्साहस्य लोकेषु, न किञ्चिदपि दुर्लभम् ॥

१४

उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु ।
उत्साहमात्रमाश्रित्य प्रतिलप्स्याम जानकीम् ॥

१५

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात्समासेन, लक्षणं सुखदुःखयोः ॥

१६

काकतालीयवत्प्राप्तं, दृष्ट्वापि निधिमग्रतः ।
न स्वयं दैवमादत्ते, पुरुषार्थमपेक्षते ॥

१७

यो न संचरते देशान्यो न सेवेत पण्डितान् ।
तस्य संकुचिता बुद्धिर्घृतबिन्दुरिवाम्भसि ॥

१८

यस्तु संचरते देशान्यस्तु सेवेत पण्डितान् ।
तस्य विस्तारिता बुद्धिस्तैलबिन्दुरिवाम्भसि ॥

१९

पश्य कर्मवशात्प्राप्तं, भोज्यकालेऽपि भोजनम् ।
हस्तोद्यमं विना वक्त्रे, प्रविशेन्न कथञ्चन ॥

२०

प्राक्कर्मवशतः सर्वं, भवत्येवेति निश्चितम् ।
तदोपदेशा व्यर्थाः स्युः, कार्याकार्यप्रबोधकाः ॥

२१

त्याज्यं न धैर्यं विधुरेऽपि काले ।
धैर्यात्कदाचिद्गतिमाप्नुयात्सः ॥
यथा समुद्रेऽपि च पोतभङ्गे ।
सांयात्रिको वाञ्छति तर्तुमेव ॥

२२

उत्तमं स्वार्जितं द्रव्यं, मध्यमं पितुरर्जितम् ।
कनिष्ठं भ्रातृवित्तञ्च, स्त्रीवित्तंचाधमाधमम् ॥

२३

अभ्यासेन क्रियाः सर्वा, अभ्यासात्सकलाः कलाः ।
अभ्यासाद् ध्यानमौनादिः, किमभ्यासस्य दुष्करम् ॥

२४

अश्वस्य लक्षणं वेगो, मदो मातङ्गलक्षणम् ।
चातुर्यं लक्षणं नार्या उद्योगः पुरुषलक्षणम् ॥




For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२५

मनसा चिन्तितं कार्यं, वाचा नैव प्रकाशयेत् ।
मन्त्ररक्षणगूढात्मा, कार्यसिद्धिं प्रकाशयेत् ॥

२६

प्रमादः परमद्वेषी, प्रमादः परमो रिपुः ।
प्रमादः मुक्तिपुर्दस्युः, प्रमादो नरकायनम् ॥

२७

षड् दोषाः पुरुषेणेह, हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोधमालस्यं दीर्घसूत्रता ॥

२८

उत्साहसम्पन्नमदीर्घसूत्रं,
क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च,
लक्ष्मीः स्वयं याति निवासहेतोः ॥

२९

प्रयत्नस्तादृशो नैव, कार्यो येन फलं न हि ।
पर्वते कूपखननात्कथं तोयसमागमः ॥

३०

मन्दोऽपि सुज्ञतामेति, अभ्यासकरणात्सदा ।
वर्षणात्सततं रज्जो रेखा भवति चोपले ॥

३१

शुभकार्ये विलम्बः स्यान्नाशुभे तु कदाचन ।
विलम्बो जायते गेहनिर्माणे न तु पातने ॥

३२

श्रमेण लभ्यं सकलं, न श्रमेण विना क्वचित् ।
सरलाङ्गुलिसंघर्षान्न, निर्याति घनं घृतम् ॥

---

## चिंता

१

चिन्ता चितयोर्मध्ये, चिन्ता एव गरीयसी ।
चिता दहति निर्जीवं, चिन्ता दहति सजीवकम् ॥

२

चिन्तातुराणां न सुखं न निद्रा,
अर्थातुराणां स्वजनो न बन्धुः ।
कामातुराणां न भयं न लज्जा,
क्षुधातुराणां न बलं न तेजः ॥

३

ओमिति पण्डिताः कुर्युरश्रुपातं च मध्यमाः ।
अधमाः शिरसः स्फोटं, शोके पुण्यं विवेकतः ॥

४

चिन्ता जरा मनुष्याणामनध्वा वाजिनां जरा ।
असंभोगो जरा स्त्रीणां, वस्त्राणामातपो जरा ॥

५

रूपं जरा सर्वसुखानि तृष्णा ।
खलेषु सेवा पुरुषाभिमानं ॥
याञ्चा गुरुत्वं गुणमात्मपूजा ।
चिन्ता बलं हन्त्यदया च लक्ष्मीम् ॥

६

भार्यावियोगः स्वजनापवादो,
ऋणस्य शेषं कृपणस्य सेवा ।
दारिद्र्यकाले प्रियदर्शनं च,
विनाऽग्निना पञ्च दहन्ति कायम् ॥

७

कुग्रामवासः कुजनस्य सेवा,
कुभोजनं क्रोधमुखी च भार्या ।
मूर्खश्च पुत्रो विधवा च कन्या,
विनाग्निना पञ्च दहन्ति कायम् ॥

८

चिन्तायां नश्यते रूपं, चिन्तायां नश्यते बलम् ।
चिन्तायां नश्यते ज्ञानं, व्याधिर्भवति चिन्तया ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

सुखस्यानन्तरं दुःखं, दुःखस्यानन्तरं सुखम् ।
सुखदुःखे मनुष्याणां, चक्रवत्परिवर्ततः ॥

१०

नष्टं मृतमतिक्रान्तं, नानुशोचन्ति पण्डिताः ।
पण्डितानां च मूर्खाणां, विशेषोऽयं यतः स्मृतः ॥

११

शोको नाशयते धैर्यं, शोको नाशयते श्रुतम् ।
शोको नाशयते सर्वं, नास्ति शोकसमो रिपुः ॥

१२

ये शोकमनुवर्तंते, न तेषां विद्यते सुखम् ।
तेजश्च क्षयते तेषां, न त्वं शोचितुमर्हसि ॥

१३

भये वा यदि वा हर्षे, संप्राप्ते यो विमर्शयेत् ।
कृत्यं न कुरुते वेगान्न स सन्तापमाप्नुयात् ॥

१४

अव्यवस्थितचित्तस्य, न जने न वने सुखम् ।
जने क्लिश्नाति सङ्गेन, वने सङ्गविवर्जितः ॥

१५

६६ क्वचिद्रुष्टः क्वचित्तुष्टो रुष्टस्तुष्टः क्षणे क्षणे ।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः ॥

१६

यस्मिन् रुष्टे भयं नास्ति, तुष्टे नैव धनागमः ।
निग्रहानुग्रहौ न स्तः, स रुष्टः किं करिष्यति ॥

१७

संतापाद् भ्रश्यते रूपं, संतापाद् भ्रश्यते बलम् ।
संतापाद् भ्रश्यते ज्ञानं, संतापाद्व्याधिमृच्छति ॥

१८

व्यवस्थितः प्रशान्तात्मा, कुपितोऽप्यभयंकरः ।
अव्यवस्थितचित्तस्य, प्रसादोऽपि भयङ्करः ॥

१९

यद्भावि तद्भवत्येव, यन्न भावि न तद्भवेत् ।
इति निश्चितबुद्धीनां, न चिन्ता बाधते क्वचित् ॥

२०

उत्तमा ह्यात्मचिन्ता च, मोहचिन्ता च मध्यमा ।
अधमा कामचिन्ता च, परचिन्ताऽधमाधमा ॥

२१

न धृतिर्न मतिर्न रतिर्न गतिर्न,
नतिर्न नुतिर्न रुचिः परमा ।
पुरुषस्य गतस्य हि शोकवशं,
व्यपयाति सुखं सकलं सहसा ॥

२२

यदि वाऽऽगमनं कुरुतेऽत्र मृतः,
सगुणं भुवि शोचनमस्य तदा ।
विगुणं विमना बहु शोचयति,
विगुणां स दशां लभते मनुजः ॥

२३

परिधावति रोदिति पूत्कुरुते
पतति स्खलति त्यजते वसनं ।
व्यथते श्लथते लभते न सुखं,
गुरुशोकपिशाचवशो मनुजः ॥

२४

क्व जपः क्व तपः क्व गृहं क्व शमः,
क्व यमः क्व दमः क्व समाधिविधिः ।
क्व धनं क्व बलं क्व गृहं क्व गुणो,
बत शोकवशस्य नरस्य भवेत् ॥

## राज-धर्म

१

असत्प्रलापः पारुष्यं, पैशुन्यमनृतं तथा । ६६
चत्वारि वाचा राजेन्द्र ! न जल्पेन्नानुचिन्तयेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२

जिते च लभ्यते लक्ष्मीर्मृते चापि सुराङ्गना ।
क्षणविध्वंसिनि काये का चिन्ता मरणे रणे ॥

३

अप्रमत्तश्च यो राजा, सर्वज्ञो विजितेन्द्रियः ।
कृतज्ञो धर्मशीलश्च, स राजा तिष्ठते चिरम् ॥

४

माता यदि विषं दद्यात्, विक्रीणाति पिता सुतं ।
राजा हरति सर्वस्वं, तत्र का परिवेदना ॥

५

शस्यानि स्वयमत्ति चेद्वसुमती माता सुतं हन्ति चे- ।
द्वेलामम्बुनिधिर्विलङ्घयति चेद् भूमिं दहेत्पावकः ।
आकाशं जनमस्तके पतति चेदन्नं विषं चेद्भवे- ॥
दन्यायं कुरुते यदि क्षितिपतिः कस्तं निरोद्धुं क्षमः ॥

६

सरस्वती स्थिता वक्त्रे, लक्ष्मीर्वेश्मनि ते स्थिता ।
कीर्तिः किं कुपिता राजन्येन देशान्तरं गता ॥

७

राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।
लोकास्तमनुवर्तंते, यथा राजा तथा प्रजाः ॥

८

नृपाणां च नराणां च, केवलं तुल्यमूर्तिता ।
आधिक्यं तु क्षमा धैर्यमाज्ञा दानं पराक्रमः ॥

९

प्रजां न रञ्जयेद्यस्तु, राजा रक्षादिभिर्गुणैः ।
अजागलस्तनस्येव, तस्य जन्म निरर्थकम् ॥

१०

गोपालेन प्रजाधेनोर्वित्तदुग्धं शनैः शनैः ।
पालनात्पोषणाद् ग्राह्यं, न्याय्यां वृत्तिं समाचरेत् ॥

११

राजा बन्धुरबन्धूनां, राजा चक्षुरचक्षुषाम् ।
राजा पिता च माता च, सर्वेषां न्यायवर्तिनाम् ॥

१२

सामदाने भेददण्डावित्युपायचतुष्टयम् ।
हस्त्यश्वरथपादाति, सेनाङ्गं स्याच्चतुष्टयम् ॥

१३

सन्मन्त्रिणा वर्धयते नृपाणां,
लक्ष्मीमहीधर्मयशःसमूहः ।
दुर्मन्त्रिणा नाशयते तथैव,
लक्ष्मीमहीधर्मयशःसमूहः ॥

१४

शुचि भूमिगतं तोयं, शुचिर्नारी पतिव्रता ।
शुचिः क्षेमकरो राजा, संतोषी ब्राह्मणः शुचिः ॥

१५

अभयस्य हि यो दाता स पूज्यः सततं नृपः ।
सत्रं हि वर्द्धते तस्य सदैवाभयदक्षिणम् ॥

१६

पुत्र इव पितुर्गेहे, विषये यस्य मानवाः ।
निर्भया विचरिष्यन्ति, स राजा राजसत्तमः ॥

१७

दुष्टस्य दण्डः स्वजनस्य पूजा,
न्यायेन कोशस्य हि वर्द्धनं च ।
अपक्षपातो निजराष्ट्ररक्षा,
पञ्चैव धर्माः कथिता नृपाणाम् ॥

१८

वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनंतरम् ।
तृतीयं धनदंडं तु, वधदण्डमतः परम् ॥

१९

सर्वदेवमयस्यापि, विशेषो भूपतेरयम् ।
शुभाशुभफलं सद्यो, नृपाद्देवाद्भवान्तरे ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२०

पात्रे त्यागी गुणे रागी, भोगी परिजनैः सह ।
भवबोद्धा रणे योद्धा प्रभुः पञ्चगुणो भवेत् ॥

२१

नयनाभ्यां प्रसुप्तोऽपि, जागर्ति नयचक्षुषा ।
व्यक्तक्रोधप्रसादश्च, स राजा पूज्यते जनैः ॥

२२

अश्वमेधसहस्रेण यो यजेत्पृथिवीपतिः ।
पालयेद्वापि धर्मेण प्रजास्तुल्यं फलं लभेत् ॥

२३

सदानुरक्तप्रकृतिः प्रजापालनतत्परः ।
विनीतात्मा हि नृपतिर्भूयसीं श्रियमश्नुते ॥

२४

न तिष्ठन्ति स्व-स्व-धर्मे, विना पालेन वै प्रजाः ।
प्रजया तु विना स्वामी, पृथिव्यां नैव शोभते ॥

२५

कृपणानाथवृद्धानां, यदश्रुं परिमार्जति ।
हर्षं संजनयन् नृणां, स राज्ञो धर्म उच्यते ॥

२६

यथा मधु समादत्ते, रक्षन्पुष्पाणि षट्पदः ।
तद्वदर्थान्मनुष्येभ्य आदद्यादविहिंसया ॥

२७

पुष्पं पुष्पं विचिन्वीत, मूलच्छेदं न कारयेत् ।
मालाकार इवारामे, न यथाऽङ्गारकारकः ॥

२८

यथा बीजांकुरः सूक्ष्मः, प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत्काले, तद्वन्मन्त्राः सुरक्षिताः ॥

२९

लोकानुग्रहकर्तारः, प्रवर्द्धन्ते नरेश्वराः ।
लोकानां संक्षयाच्चैव, क्षयं यान्ति न संशयः ॥

३०

आज्ञा कीर्तिः पालनं सज्जनानां,
दानं भोगो मित्रसंरक्षणञ्च ।
येषामेते षड्गुणा न प्रवृत्ताः,
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥

३१

अदण्ड्यान्दण्डयन् राजा, दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति, नरकञ्चैव गच्छति ॥

३२

छेदश्चन्दनचूतचम्पकवने रक्षापि शाखोटके ।
हिंसा हंसमयूरकोकिलकुले काकेषु नित्यादरः ।
मातङ्गेन खरक्रयः समतुला कर्पूरकार्पासयोः ।
एषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः ॥

३३

यथा देशस्तथा भाषा यथा राजा तथा प्रजाः ।
यथा भूमिस्तथा तोयं यथा बीजं तथाङ्कुरः ॥

३४

स्वधर्मरूपो राजेन्द्रो दयारूपेण मन्त्रिणः ।
सेवकाः साधुरूपेण यथा राजा तथा प्रजाः ॥

३५

राजा राक्षसरूपेण व्याघ्ररूपेण मन्त्रिणः ।
सेवकाः साधुरूपेण यथा राजा तथा प्रजाः ॥

३६

अश्विनी सूयते वत्सं कामधेनुस्तुरंगमम् ।
नद्यां संजायते वह्निर्यथा राजा तथा प्रजाः ॥

३७

तावन्नीतिपरा धराधिपतयस्तावत्प्रजाः सुस्थिताः ।
तावन्मित्रकलत्रपुत्रपितरस्तावन्मुनीनां तपः ॥
तावन्नीतिसुरीतिकीर्तिविमलास्तावच्च देवार्चनम् ।
यावत्सप्रतिवत्सरं जलधरः क्षोणीतले वर्षति ॥

३८

सर्वदा सर्वदोऽसीति मिथ्या त्वं स्तूयसे बुधैः ।
नारयो लेभिरे पृष्ठं न वक्षः परयोषितः ॥



For Private And Personal Use Only

३९

छत्रेषु दण्डश्चमरेषु बन्धः शारीषु मारिश्च मदो गजेषु ।
हारेषु वै छिद्रविलोकनानि कन्या विवाहे करपीडनं च ॥

४०

नियुक्तहस्तार्पितराज्यभारा-
स्तिष्ठन्ति ये सौधविहारसाराः ।
बिडालवृन्दार्पितदुग्धपूराः
स्वपन्ति ते मूढधियः क्षितीन्द्राः ॥

४१

वापी वप्र[१] विहार[२] वर्ण[३] वनिता वाग्मी[४] वनं वाटिका[५] ।
वैद्य ब्राह्मण वादि वेश्म[६] विबुधा[७] वाचंयमा[८] वल्लकी[९] ॥
विद्या वीर विवेकवित्त विनया वेश्या वणिक् वाहिनी[१०] ।
वस्त्रं वारण[११] वाजि[१२] वेसर[१३] वरं राज्यं तु वै शोभते ॥

———

१ किला २ भव्यभवन ३ चारवर्ण ४ वाचाल-नर ५ बगीचा ६ हवेली ७ पंडित ८ साधु ९ वीणा १० सेना ११ हाथी १२ घोडा १३ खच्चर ।



# वर्णधर्म

१

कामः क्रोधो भयं लोभः, शोकश्चिन्ता क्षुधा तथाः ।
सर्वेषां नः प्रभवति, कस्माद्वर्णो विभज्यते ॥

२

स्वेदमूत्रपुरीषाणि, श्लेष्मपित्तं सशोणितम् ।
तनुः क्षरति सर्वेषां, कस्माद्वर्णो विभज्यते ॥

३

## ब्राह्मण

जितेन्द्रियो धर्मपरः, स्वाध्यायनिरतः शुचिः ।
कामक्रोधौ वशौ यस्य, तं देवा ब्राह्मणं विदुः ॥

४

न क्रुध्येन्न प्रहृष्येच्च, मानितोऽमानितश्च यः ।
सर्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः ॥

५

नानृतं ब्राह्मणो ब्रूते, न हन्ति प्राणिनं द्विजः ।
न सेवां कुरुते विप्रो, न द्विजः पापकृद्भवेत् ॥

६

शमो दमस्तपः शौचं, क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं, ब्रह्मकर्म स्वभावजम् ॥

७

ये शान्त-दान्ताः श्रुतिपूर्णकर्णा,
जितेन्द्रियाः स्त्रीविषये निवृत्ताः ।
प्रतिग्रहे संकुचिताभिहस्तास्ते,
ब्राह्मणास्तारयितुं समर्थाः ॥

८

धर्मश्च सत्यञ्च तपो दमश्च,
अमात्सर्यं ह्रीस्तितिक्षाऽनसूया ।
दानं श्रुतं चैव धृतिः क्षमा च,
महाव्रता द्वादश ब्राह्मणस्य ॥

९

## क्षत्रिय

श्रुतिस्मृती चेव नेत्रे, विप्राणां परिकीर्तिते ।
एकेन विकलः काणो, द्वाभ्यामन्धः प्रकीर्तितः ॥

१०

अधो दृष्टिर्नैष्कृतिकः, स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च, वकव्रत चरो द्विजः ॥

११

धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः ।
बैडालव्रतिको ज्ञेयो, हिंस्रः सर्वाभिसन्धकः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१२

ये वकव्रतिनो विप्रा, ये च मार्जारलिङ्गिनः ।
ते पतन्त्यन्धतामिस्रे, तेन पापेन कर्मणा ॥

१३

क्रियाहीनश्च मूर्खश्च, सर्वधर्मविवर्जितः ।
निर्दयः सर्वभूतेषु, विप्रश्चाण्डाल उच्यते ॥

१४

असिजीवी मषीजीवी, देवलो ग्रामयाचकः[1] ।
धावकः[2] पाचकश्चैव[3], षडेते ब्राह्मणाधमाः ॥

१५

उर्ध्वं गच्छन्ति नोद्गाराः, नाधो गच्छन्ति वायवः ।
निमंत्रणे समायाते, किं कर्त्तव्यं मयाधुना ॥

१६

भोजनं कुरु दुर्बुद्धे, मा शरीरे दयां कुरु ।
परान्नं दुर्लभं लोके, शरीराणि पुनः पुनः ॥

१७

दयादानपरो नित्यं, जीवमेव प्ररक्षयेत् ।
चाण्डालो वा स शूद्रो वा, स वै ब्राह्मण उच्यते ॥

१ ग्रामजोशी २ जासूद ३ आचारी

क्षत्रिय

१८

शौर्यं तेजो धृतिर्दाक्ष्यं, युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च, क्षात्रं कर्म स्वभावजम् ॥

१९

लोकसंरक्षणे दक्षः, शूरो दान्तः पराक्रमी ।
दुष्टनिग्रहशीलो यः, स वै क्षत्रिय उच्यते ॥

२०

प्रजानां रक्षणं दानमिज्याऽध्ययनमेव च ।
विषयेष्वप्रसक्तिश्च, क्षत्रियस्य समासतः ॥

२१

ब्राह्मणस्य तपो ज्ञानं, तपः क्षत्रस्य रक्षणम् ।
वैश्यस्य तपो वार्ता, ४ तपः शूद्रस्य सेवनम् ॥

---

## जातिर्न कारणम्

१

न जात्या ब्राह्मणश्चात्र, क्षत्रियो वैश्य एव न ।
न च शूद्रो न वै म्लेच्छो, भेदिता गुणकर्मभिः ॥

४ कृषि, गोपालन, व्यापार

२

शूद्रो ब्राह्मणतामेति, ब्राह्मणश्चैति शूद्रताम् ।
क्षत्रियाज्जातमेवन्तु, विद्याद्वैश्यात्तथैव च ॥

३

न कुलेन न जात्या वा, क्रियाभिर्ब्राह्मणो भवेत् ।
चाण्डालोऽपि हि वृत्तस्थो, ब्राह्मणः स युधिष्ठिर ॥

४

गणिकागर्भसंभूतो, वसिष्ठश्च महामुनिः ।
तपसा ब्राह्मणो जातः, संस्कारस्तत्र कारणम् ॥

५

जातो व्यासस्तु कैवर्त्याः श्वपाक्यास्तु पराशरः ।
बहवोऽन्येपि विप्रत्वं, प्राप्ता ये पूर्वमद्विजाः ॥

६

विश्वामित्रो वसिष्ठश्च, मतङ्गो नारदादयः ।
तपोविशेषैः संप्राप्ताः, उत्तमत्वं न जातितः ॥

७

हरिणीगर्भसंभूतः, ऋष्यश्रृङ्गो महामुनिः ।
तपसा ब्राह्मणो जातः, संस्कारस्तेन कारणम् ॥

८

श्वपाकीगर्भसंभूतः, पिता व्यासस्य पार्थिव ।
तपसा ब्राह्मणो जातः, संस्कारस्तेन कारणम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

९

उलूकीगर्भसंभूतः, कणादाख्यो महामुनिः ।
तपसा ब्राह्मणो जातः, संस्कारस्तेन कारणम् ॥

१०

नाविकागर्भसंभूतः, मन्दपोला महामुनिः ।
तपसा ब्राह्मणो जातः, संस्कारस्तेन कारणम् ॥

११

भिल्लिकागर्भसंभूतो, वाल्मीकिश्च महामुनिः ।
तपसा ब्राह्मणो जातः, संस्कारस्तेन कारणम् ॥

१२

जातो व्यासस्तु कैवर्त्याः, श्वपाक्याश्च पराशरः ।
शुक्याः शुकः कणादाख्यस्तथोलूक्या सुतोऽभवत् ॥

१३

कर्मशीलगुणाः पूज्यास्तथा जातिकुले न हि ।
न जात्या न कुलेनैव, श्रेष्ठत्वं प्रतिपद्यते ॥



# गृहस्थ स्वरूप

१

सानन्दं सदनं सुताश्च सुधियः कान्ता मनोहारिणी ।
सन्मित्रं सधनं स्वयोषिति रतिश्चाज्ञापराः सेवकाः ॥
आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे ।
साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः ॥

२

क्रोशन्तः शिशवः सवारि सदनं पङ्कावृतं चाङ्गणं ।
शय्या दंशवती च रूक्षमशनं धूमेन पूर्णः सदा ॥
भार्या निष्ठुरभाषिणी प्रभुरपि क्रोधेन पूर्णः सदा ।
स्नानं शीतलवारिणा हि सततं धिग् धिग् गृहस्थाश्रमम्

३

विभागशीलो यो नित्यं, क्षमायुक्तो दयालुकः ।
देवतातिथिभक्तश्च, गृहस्थः स तु धार्मिकः ॥

४

यथा वायुं समाश्रित्य, वर्तन्ते सर्वजन्तवः ।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ॥

५

देवैश्चैव मनुष्यैश्च, तिर्यग्भिश्चोपजीव्यते ।
गृहस्थं प्रत्यहं यस्मात्तस्माज्जेष्ठाश्रमो गृही ॥

६

तप्त्वा तपस्वी विपिने क्षुधार्तो,
गृहं समायाति सदान्नदातुः ।
भुक्त्वा स चान्नं प्रददाति तस्मै,
तपोविभागं भजते हि तस्य ॥

७

वनेपि दोषाः प्रभवन्ति रागिणां,
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्तते,
निवृत्तरागस्य गृहं तपोवनम् ॥

८

सुभिक्षं कृषके नित्यं, नित्यं सुखमरोगिणि ।
भार्या भर्तुः प्रिया यस्य, तस्य नित्योत्सवं गृहम् ॥

९

अर्थागमो नित्यमरोगिता च,
प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या,
षड् जीवलोकस्य सुखानि राजन् ॥

१०

यस्य पुत्रो वशीभूतो, भार्या छन्दानुगामिनी ।
विभवे यश्च सन्तुष्टस्तस्य स्वर्ग इहैव हि ॥



For Private And Personal Use Only

११

सती सुरूपा सुभगा विनीता,
प्रेमाभिरामा सरलस्वभावा ।
सदा सदाचारविचारदक्षा,
सा प्राप्यते पुण्यवशेन पत्नी ॥

१२

आनंदरूपा तरुणी नतांगी,
सद्धर्मसंसाधनसृष्टिरूपा ।
कामार्थदा यस्य गृहे न नारी,
वृथा गतं तस्य नरस्य जीवितम् ॥

१३

प्राणान्न हिंस्यान्न पिबेच्च मद्यं,
वदेच्च सत्यं न हरेत्परार्थम् ॥
परस्य भार्यां मनसाऽपि नेच्छेत ,
स्वर्गं यदीच्छेत गृहवत्प्रवेष्टुम् ॥

१४

कुले कलङ्कः कवले कदन्नता,
सुतः कुबुद्धिर्भवने दरिद्रता ।
रुजः शरीरे कलहप्रिया प्रिया,
गृहागमे दुर्गतयः षडेते ॥

१५

विद्यते कलहो यत्र, गृहे नित्यमकारणः ।
तद्गृहं जीवितं वाञ्छन्, दूरतः परिवर्जयेत् ॥

## श्रावक

१

श्रद्धालुतां श्राति, जिनेन्द्रशासने,
धनानि पात्रेषु वपत्यनारतम् ।
कृन्तत्यपुण्यानि सुसाधुसेवना-
दतोऽपि तं श्रावकमाहुरुत्तमाः ॥

२

जैनो धर्मो दयामूलो, जन्म सुश्रावके कुले ।
गुरूणां पदभक्तिश्च, विना पुण्यं न लभ्यते ॥

३

सिद्धान्तश्रवणे श्रद्धा, विवेकव्रतपालनम् ।
दानादिकरणं सेवा, ह्येतच्छ्रावकलक्षणम् ॥

४

नो भुञ्जेत् किल रात्रिभोजनमथो नो कन्दमूलाशनम् ।
नो कुर्याद्ध्रुवमन्यदारगमनं मात्रा समं मन्यते ॥
नो सेवेत कदापि सप्तव्यसनं नो दीर्घवैरं तथा ।
यस्यैतद् गुणपंचकं हृदि वसेत्तच्छ्रावकत्वं परम् ॥

५

९ ५ १० १७ ४ ५ १२
तत्त्वानि व्रत धर्म संयम गति ज्ञानानि सद्भावना ।
१० २२ ५ ८ ४ ३
प्रत्याख्यान परीषहेन्द्रिय मद ध्यानानि रत्नत्रयम् ॥
६ ६ ६ १५ ५ १० १२
लेश्यावश्यक काय योग समिति प्राणाः प्रमादास्तपः ।
४ ८ २५ ३ ३४
संज्ञाकर्म कषायगुप्त्यतिशया ज्ञेयाः सुधीभिः सदा ॥

६

१ २ ३ ४ ५
मृच्चालिनी महिष हंस शुकस्वभावाः,
६ ७ ८ ९ १०
मार्जार कंक मशकाज जलौक तुल्याः ।
११ १२ १३ १४
सच्छिद्रकुंभ पशु सर्प शिलोपमानाः,
ते श्रावका भुवि चतुर्दशधा भवन्ति ॥

७

गुणगणवृद्धो द्रविणसमृद्धो,
निजहितबुद्धो विषयेऽगृद्धः ।
अनयविरुद्धो निजरिपुक्रुद्धो,
सत्यसुबुद्धो श्राद्धविशुद्धः ॥


७५

८

अयमर्थो परोऽनर्थ—इति निश्चयशालिना ।
भावनीया अस्थिमज्जा धर्मेणैव विवेकिना ॥

९

अणुव्रतानि पञ्च स्युस्त्रिप्रकारं गुणव्रतम् ।
शिक्षाव्रतानि चत्वारि सागाराणां जिनागमे ॥

१०

हस्तौ दानविधौ मनो जिनमते वाचः सदा सूनृते ।
प्राणाः सर्वजनोपकारकरणे वित्तानि ज्ञानोत्सवे ॥
येनैवं विनियोजितानि शतशो विश्वत्रयीमंडनं ।
धन्यः कोऽपि स विष्टपैकतिलकः काले कलौ श्रावकः ॥

---

## निंदक

१

स्वस्तुतिं परनिंदां वा, कर्ता लोकः पदे पदे ।
परस्तुतिं स्वनिंदां वा कर्ता कोऽपि न दृश्यते ॥

२

"परीवादात्खरो भवति, श्वा वै भवति निन्दकः ।
परिभोक्ता कृमिर्भवति, कीटो भवति मत्सरी ॥

३

प्रत्यक्षे गुणवादी यः, परोक्षे चापि निन्दकः ।
स मानवः श्ववल्लोके, नष्टलोकपरावरः ॥

४

असम्माने तपोवृद्धिः, संमानाच्च तपःक्षयः ।
पूजया पुण्यहानिः स्यान्निन्दया सद्गतिर्भवेत् ॥

५

पक्षिषु काकश्चाण्डालः, पशुः चाण्डालजंबुकः ।
मुनीनां कोपश्च चाण्डालः, सर्वचाण्डाल निंदकः ॥

६

मन्निन्दया यदि जनः परितोषमेति ।
नन्वप्रयत्नसुलभोऽयमनुग्रहो मे ॥
श्रेयोऽर्थिनोऽपि पुरुषाः परतुष्टिहेतोः ।
दुःखार्जितान्यपि धनानि परित्यजन्ति ॥

७

वक्तुं नैव क्षमा जिह्वा, यदि मूकस्य तद्वरम् ।
परं परापवादं च, जंजप्यते न तद्वरम् ॥

८

परपरिभवपरिवादात्मोत्कर्षाच्च बध्यते कर्म ।
नीचैर्गोत्रं प्रतिभवमनेकभवकोटिदुर्मोचम् ॥

९

सदा मूकत्वमासेव्यं, वाच्यमानेऽन्यमर्मणि ।
श्रुत्वा तथा स्वमर्माणि, बाधिर्यं कार्यमुत्तमैः ॥

१०

पश्येदपररंध्राणि,[१] स्वरंध्राण्यप्रकाशयन् ।
अहत्वा तिमिरं नीचैर्दीपोऽन्यत्र प्रकाशते ॥

---

## श्रोता

१

वक्तारः किं करिष्यन्ति, श्रोता यत्र न विद्यते ।
नग्नक्षपणके देशे, रजकः किं करिष्यति ॥

२

अप्रियस्यापि पथ्यस्य, परिणामः सुखावहः ।
वक्ता श्रोता च यत्रास्ति, रमन्ते तत्र सम्पदः ॥

३

सुलभाः पुरुषा राजन्सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य, वक्ता श्रोता च दुर्लभः ॥

१ दोषरूप छिद्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



४

वागुच्चारोत्सवं मात्रं, तत्क्रियां कर्तुमक्षमाः ।
कलौ वेदान्तिनो भान्ति, फाल्गुने बालका इव ॥

५

परोपदेशे पाण्डित्यं, सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयमनुष्ठानं, कस्यचित्सुमहात्मनः ॥

६

परोपदेशपाण्डित्ये, शिष्टाः सर्वे भवन्ति वै ।
विस्मरन्तीह शिष्टत्वं, स्वकार्ये समुपस्थिते ॥

७

परोपदेशसमये, जनाः सर्वेऽपि पण्डिताः ।
तदनुष्ठानसमये, मुनयोऽपि न पण्डिताः ॥

८

वाग्मी व्याससमासवित्प्रियकथः प्रस्ताववित्सत्यवाक् ।
संदेहच्छिदशेषशास्त्रकुशलो नाख्याति विक्षेपकृत् ॥
अव्यंगो जनरंजको जितसभो नाऽहं कृतोद्धार्मिकः ।
संतोषीति चतुर्दशोत्तमगुणा वक्तुः प्रणीता इमे ॥

## कृतघ्ननिन्दा

१

ब्रह्मघ्ने च सुरापे च, भग्नव्रते च वै तथा ।
निष्कृतिर्विहिता लोके, कृतघ्ने नास्ति निष्कृतिः ॥

२

मित्रद्रोही कृतघ्नश्च, तथा विश्वासघातकः ।
ते नराः नरकं यान्ति, यावच्चन्द्रदिवाकरौ ॥

३

विश्वासप्रतिपन्नानां, वञ्चने का विदग्धता ।
अङ्कमारुह्य सुप्तानां, हन्तुः किं नाम पौरुषम् ॥

४

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिःपक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते ॥

५

ब्रह्महत्यादिपापानां, कथंचिन्निष्कृतिर्भवेत् ।
विश्वासघातकानां तु, निष्कृतिर्नास्ति कुत्रचित् ॥

## परद्रोह

१

ताडनं छेदनं क्लेशकरणं वित्तबन्धनम् ।
परेषां कुरुते यत्तु, परद्रोहः स उच्यते ॥

२

पैशून्यं परिवादं च, गालिदानं च तर्जनम् ।
मर्मोद्घाटं विधत्ते यत्, परद्रोहः स उच्यते ॥

३

गृहद्वारवसुक्षेत्रं, वस्त्रधान्यं धनादिकम् ।
हरते यत्तु मूढात्मा, परद्रोहः स उच्यते ॥

## प्रवासः

१

यो न संचरते देशान्, यो न सेवेत पण्डितान् ।
तस्य संकुचिता बुद्धिर्घृतबिन्दुरिवाम्भसि ॥

२

यस्तु संचरते देशान्; यस्तु सेवेत पण्डितान् ।
तस्य विस्तारिता बुद्धिस्तैलबिन्दुरिवाम्भसि ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३

यस्मिन्देशे न सन्मानो, न प्रीतिर्न च बान्धवाः
न च विद्यागमो कश्चित् तत्र दिवसं वसेत् ॥

४

देशाटनं पण्डितमित्रता च,
वाराङ्गना राजसभाप्रवेशः ।
अनेकशास्त्रार्थविलोकनं च,
चातुर्यमूलानि भवन्ति पञ्च ॥

५

भ्रमन् सम्पूज्यते राजा, भ्रमन्सम्पूज्यते द्विजः ।
भ्रमन्सम्पूज्यते योगी, स्त्री भ्रमन्ती विनश्यति ॥

---

## स्थानमाहात्म्यम्

१

नक्रः १ स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानाच्छुनापि २ परिभूयते ॥

२

राजा कुलवधूर्विप्रा, मन्त्रिणश्च पयोधराः ।
स्थानभ्रष्टा न शोभन्ते, दन्ताः केशा नखा नराः ॥

१ मगर २ कुत्ता

३

स्थानभ्रष्टा न शोभन्ते, दन्ताः केशा नखा नराः ।
इति विज्ञाय मतिमान्स्वस्थानं न परित्यजेत् ॥

४

अश्वः शस्त्रं शास्त्रं, वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्ता, भवन्ति योग्या अयोग्या च ॥

५

विना कार्येण ये मूढा गच्छन्ति परमन्दिरम् ।
अवश्यं लघुतां यान्ति, कृष्णपक्षे यथा शशी ॥

६

कष्टं खलु मूर्खत्वं, कष्टं खलु यौवनेऽपि दारिद्र्यम् ।
कष्टादपि कष्टतरं, परगृहवासः परान्नं च ॥

७

नाभ्युत्थानक्रिया यत्र नालापा मधुराक्षराः ।
गुणदोषकथा नैव तत्र हर्म्ये न गम्यते ॥

---

## स्वच्छंदी

१

बन्धनस्थो हि मातङ्गः, सहस्रभरणक्षमः ।
अपि स्वच्छन्दचारी श्वा, स्वोदरेणापि दुखितः ॥

२

अन्तर्वसति मार्जारी, शुनी वा राजवेश्मनि ।
बहिर्बद्धोपि मातङ्गः, ततः किं लघुतां गतः ॥

---

## जरा

१

गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावलिः ।
दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं च लालायते ॥
वाक्यं नाद्रियते च बान्धवजनैर्भार्या न शुश्रूषते ।
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोप्यमित्रायते ॥

२

कृतान्तस्य दूती जरा कर्णमूले,
समागत्य वक्तीति लोका शृणुध्वम् ।
परस्त्रीपरद्रव्यवाञ्छां त्यजध्वं,
भजध्वं रमानाथपादारविन्दम् ॥

३

वपुः कुब्जीभूतं गतिरपि तथा यष्टिशरणा ।
विशीर्णा दन्तालिः श्रवणविकलं श्रोत्रयुगलम् ॥
शिरः शुक्लं चक्षुस्तिमिरपटलैरावृतमहो ।
मनो मे निर्लज्जं तदपि विषयेभ्यः स्पृहयति ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

४

अधः पश्यसि किं वृद्ध, किञ्चित्ते पतितं भुवि ।
अरे मूढ न जानासि, गतं तारुण्यमौक्तिकम् ॥

५

जरादण्डप्रहारेण, भग्नकटिमयाकृतम् ।
गतं मे यौवनं रत्नं, पश्यामि च पदे पदे ॥

६

यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाज्जर्जरभूते देहे, वार्तां कोऽपि न पृच्छति गेहे ॥

७

अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनम् ।
आयुष्यं जललोलबिन्दुचपलं फेनोपमं जीवनम् ॥
दानं यो न करोति निश्चलमतिर्भोगं न भुंक्ते च यः ।
पश्चात्तापयुतो जरापरिगतः शोकाग्निना दह्यते ॥

## क्षुधा

१

मानं मुञ्चति गौरवं परिहरत्यायाति दीनात्मतां ।
लज्जामुत्सृजति श्रयत्यकरुणां नीचत्वमालम्बते ॥
७६ भार्याबन्धुसुहृत्सुतेष्वपकृतिर्नानाविधा चेष्टते ।
किं किं यन्न करोति निंदितमपि प्राणी क्षुधापीडितः ॥

२

नास्ति क्षुधा समं दुःखं, नास्ति रोगः क्षुधा समः ।
नास्त्याहारसमं सौख्यं, नास्ति क्रोधसमो रिपुः ॥

३

अर्थातुराणां न सुखं न निद्रा,
कामातुराणां न भयं न लज्जा ।
विद्यातुराणां न सुखं न निद्रा,
क्षुधातुराणां न रुचिर्न वेला ॥

४

अस्य दग्धोदरस्यार्थे, किं न कुर्वन्ति पण्डिताः ।
वानरीमिव वाग्देवीं, नर्तयन्ति गृहे गृहे ॥

५

किमकारि न कार्पण्यं, कस्यालंघि न देहली ।
अस्य पापोदरस्यार्थे, किमनाटि न नाटकम् ॥

६

जटिलो मुण्डी लुञ्चितकेशः, काषायाम्बरबहुकृतवेषः ।
पश्यन्नपि च न पश्यति मूढ उदरनिमित्तं बहुकृतवेषः ॥

७

कान्तिः कीर्त्तिर्मतिः क्षांतिः,
शान्तिर्नीतिर्गती रतिः ।
उक्तिः शक्तिर्द्युतिः प्रीतिः,
प्रतीतिः श्रीर्व्यवस्थितिः ॥

८

न पश्यति न जानाति, न शृणोति न जिघ्रति ।
न स्पृशति न वा वक्ति, भोजनेन बिना जनः ॥

९

राज्यं कुञ्जरचामरे च कुसुमं छत्रध्वजः काञ्चनम् ।
गीतं नादविनोदशास्त्ररचना सम्भोगरत्नावली ॥
विद्या काव्यनटाद्यनाटकगुणा रत्नं तथा मन्दिरं ।
एषा सर्वविडम्बना शृणु सखे ! एकं हि चान्नंविना ॥

१०

या सा रूपविनाशिनी स्मृतिहरी पञ्चेन्द्रियाकर्षिणी ।
चक्षुः श्रोत्रललाटदीनकरणी वैराग्यसम्पादिनी ॥
बन्धूनां त्यजनी विदेशगमनी चारित्रविध्वंसिनी ।
सा मे तिष्ठति सर्वभूतदमनी प्राणापहारी क्षुधा ॥

## अवसर

१

अति परिचयादवज्ञा, संततगमनादनादरो भवति । ७६
लोकः प्रयागवासी, कूपे स्नानं समाचरति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२

अति परिचयादवज्ञा, संततगमनादनादरो भवति।
मलये भिल्लपुरंध्री, चन्दनतरुकाष्ठमिन्धनं कुरुते ॥

३

कटुकं वा मधुरं वा, प्रस्तुतवाक्यं मनोहारि ।
वामे गर्दभनादश्चित्तप्रीत्यै प्रयाणेषु ॥

४

मञ्जुलापि न वाग्भाति, प्रोक्तानवसरे जनैः ।
शृङ्गारः शोभते नैव, संगरे[1] भूरिवर्णितः ॥

५

अरसापि हि वाग्भाति, प्रोक्तावसर एव हि ।
सर्वचित्तप्रमोदाय गालिदानं करग्रहे ॥

६

धैर्येण कार्यं भवति, माऽधैर्यं हि समाश्रय ।
फलन्ति समये वृक्षाः, सिक्ता अपि बहूदकैः ॥

७

वनानि दहतो वह्नेः, सखा भवति मारुतः ।
स एव दीपनाशाय, कृशे कस्यापि सौहृदम् ॥

१ युद्ध में

## मौनं

१

आत्मनो मुखदोषेण, बध्यन्ते शुकसारिकाः ।
बकास्तत्र न बध्यन्ते, मौनं सर्वार्थसाधनम् ॥

२

पठतो नास्ति मूर्खत्वं, जपतो नास्ति पातकम् ।
मौनिनः कलहो नास्ति, न भयं चास्ति जागृतः ॥

३

दुर्बलस्य बलं राजा, बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं, चौराणामनृतं बलम् ॥

४

भद्रं भद्र कृतं मौनं, कोकिलैर्जलदागमे ।
वक्तारो दर्दुरा यत्र, तत्र मौनं हि शोभते ॥

५

कोलाहले काककुलस्य जाते,
विराजते कोकिलकूजितं किम् ।
परस्परं संवदतां खलानां,
मौनं विधेयं सततं सुधीभिः ॥

६

मौखर्यं लाघवकरं, मौनमुन्नतिकारकम् ।
मुखरं नूपुरं पादे, कण्ठे हारो विराजते ॥

७

तावन्मौनेन नीयन्ते, कोकिलैश्चैव वासराः ।
यावत्सर्वजनानन्ददायिनी वाक् प्रवर्तते ॥

## पश्चात् प्रशंसा

१

प्रत्यक्षे गुरवः स्तुत्याः, परोक्षे मित्रबान्धवाः ।
कार्यान्ते दासी भृत्याश्च, पुत्रो नैव मृताः स्त्रियः ॥

२

जीर्णमन्नं प्रशंसीयाद्भार्यां च गतयौवनाम् ।
रणात्प्रत्यागतं शूरं, सस्यं च गृहमागतम् ॥

३

आपत्सु मित्रं जानीयाद्युद्धे शूरमृणे शुचिम् ।
भार्यां क्षीणेषु वित्तेषु, व्यसनेषु च बान्धवान् ॥

## विचार पूर्वक कार्यं

१

अपरीक्षितं न कर्तव्यं, कर्तव्यं सुपरीक्षितं ।
पश्चाद्भवति संतापो, ब्राह्मणी नकुलो यथा ॥

२

कृतस्य करणं नास्ति, मृतस्य मरणं न हि ।
पिष्टस्य पेषणं नास्ति, द्वितीये तृतीये न हि ॥


८०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३

या मतिर्जायते पश्चात्, सा यदि प्रथमं भवेत् ।
न विनश्येत्तदा कार्यं, न हसेत्कोऽपि दुर्जनः ॥

४

निर्वाणदीपे १ किमु तैलदानं,
चौरे गते वा किमु सावधानम ।
वयोगते किं वनिताविलासः,
पयोगते किं खलु सेतुबन्धः ॥

५

सुखस्यानन्तरं दुःखं, दुःखस्यानन्तरं सुखम् ।
सुखदुःखावृते लोके, नेहायास्येकमन्तरम् ॥

६

कर्मायत्तं फलं पुंसां, बुद्धिः कर्मानुसारिणी ।
तथापि सुधिया भाव्यं, सुविचार्यैव कुर्वता ॥

७

वेदद्गुलांतरं २ ज्ञेयं, सत्यासत्यविनिर्णये ।
श्रुतं न मनुते कोपि, प्रमाणं प्रोक्तदृष्टयोः ॥

८

विचार्य्यं स्वगतिं धीमान्निजवृत्तिं समाचरेत् ।
वस्त्रं दृष्ट्वा चरणयोर्युक्तमेव प्रसारणम् ॥

१ बुझा हुआ दीपक २ चार

९

परीक्ष्यैव तु कर्तव्यं, प्रथमं क्रियते तु यत् ।
पीत्वा जलं पुनः पृच्छा, गेहस्येति न सांप्रतम् ॥

१०

विना सुनिश्चयं सत्यं, विज्ञेयं नान्यभाषितम् ॥
रज्जुर्यथा तमस्विन्यां १ सर्परूपेण भासते ॥

---

## षट् लेश्यास्वरूप

१

अतिरौद्रः सदा क्रोधी, मत्सरी धर्मवर्जितः ।
निर्दयो वैरसंयुक्तः, कृष्णलेश्याधिको नरः ॥

२

अलसो मन्दबुद्धिश्च, स्त्रीलुब्धः परवंचकः ।
कातरश्च सदा मानी, नीललेश्याधिको भवेत् ॥

३

शोककुलः सदा रुष्टः, परनिंदात्मशंसकः ।
संग्रामे दारुणो दुःस्थः, कापोतक उदाहृतः ॥

४

विद्यावान् करुणायुक्तः कार्याकार्यविचारकः ।
लाभालाभे सदा प्रीतः, पीतलेश्याधिको नरः ॥

१ रात्रि में

५

क्षमावान् निरतस्त्यागे, देवार्चनरतो यमी[1] ।
शुचिभूतः सदानन्दी, पद्मलेश्याधिको भवेत् ॥

६

रागद्वेषविनिर्मुक्तः, शोकनिन्दाविवर्जितः ।
परमात्मभावसंपन्नः, शुक्ललेश्यो भवेन्नरः ॥

७

कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः ।
स्फटिकस्येव तत्राऽयं, लेश्याशब्दः प्रवर्तते ॥

८

यादृशी जायते लेश्या, समयेऽन्त्ये शरीरिणः ।
तादृश्येव भवेल्लेश्या, प्रायस्तस्यान्यजन्मनि ।

१ इन्द्रियों को जीतने वाला

---

## नास्तिक स्वरूप

१

आर्ता देवान् नमस्यन्ति, तपः कुर्वन्ति रोगिणः ।
अधना दातुमिच्छन्ति, वृद्धा नार्यः पतिव्रताः ॥

२

यावज्जीवं सुखं जीवेदृणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३

अशक्तस्तु भवेत् साधुः, कुरूपा च पतिव्रता ।
व्याधितो देवभक्तश्च, निर्धना ब्रह्मचारिणः ॥

४

अपुत्रस्य गतिर्नास्ति, स्वर्गो नैव च नैव च ।
तस्मात्पुत्रमुखं दृष्ट्वा, पश्चाद्भवति तापसः ॥

५

हस पिब च खाद मोद नित्यं,
भुंक्ष्व च भोगान् यथाऽतिकामं ।
यदि विदितं कपिलमतं, १
तत्प्राप्स्यसि मोक्षसौख्यमचिरेण ॥

६

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा ।
यज्ञो हि भूत्यै सर्वस्य, तस्माद्यज्ञे वधोऽवधः ॥

७

इहलोके सुखं हित्वा, ये तपस्यन्ति दुर्धियः ।
हित्वा हस्तगतं ग्रासं, ते लिहन्ति पदांगुलिम् ॥

८

केचिद्वदन्ति मूढा, हन्तव्या जीवघातिनो जीवाः ।
परजीवरक्षणार्थं, धर्मार्थं पापनाशार्थम् ॥

---

१ सांख्यमत

९

पीत्वा पीत्वा पुनः पीत्वा, यावत्पतति भूतले ।
पुनरुत्थाय पुनः पीत्वा, स्वर्गं गच्छन्ति मानवाः ॥

१०

लोकायता वदन्त्येवं, नास्ति देवो न निर्वृतिः ।
धर्माधर्मौ न विद्येते, न फलं पुण्यपापयोः ॥

११

पञ्चभूतात्मकं वस्तु, प्रत्यक्षं च प्रमाणकम् ।
नास्तिकानां मते नान्यदात्माऽमुत्र शुभाशुभम् ॥

१२

ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ।
अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ॥

१३

न नर्मयुक्तं वचनं हिनस्ति ।
न स्त्रीषु राजन्न विवाहकाले ॥
प्राणात्यये सर्वधनापहारे ।
पञ्चाऽनृतान्याहुरपातकानि ॥

१४

न स्वर्गो वाऽपवर्गो वा, नैवात्मा पारलौकिकः ।
नैव वर्णाश्रमादीनां, क्रिया च फलदायिका ॥

१५

ऋतुस्नाना तु या नारी पतिं नैवोपविन्दति ।
शुनी वृकी शृगाली स्याच्छूकरी गर्दभी च सा ॥

१६

ऋतुस्नाना तु या नारी भर्तारं नोपसर्पति ।
सा मृता नरकं याति विधवा च पुनः पुनः ॥

---

## जैन-धर्म

१

स्याद्वादो वर्त्तते यस्मिन्, पक्षपातो न विद्यते ।
नास्त्यन्यपीडनं किञ्चित्, जैनधर्मः स उच्यते ॥

२

स्याद्वादश्च प्रमाणे द्वे, प्रत्यक्षं च परोक्षकम् ।
नित्यानित्यं जगत्सर्वं, नवतत्त्वानि सप्त वा ॥

३

जीवाजीवौ पुण्यपापे, आस्रवः संवरोऽपि च ।
बन्धो निर्जरणं मुक्तिरेषां, व्याख्याधुनोच्यते ॥

४

धर्माधर्मौ नभः कालः, पुद्गलश्चेतनस्तथा ।
द्रव्यषट्कमिदं ख्यातं, सर्वज्ञैर्जिननायकैः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५

सरजोहरणा भैक्ष्यभुजो, लुञ्चितमूर्द्धजाः ।
श्वेताम्बराः क्षमाशीला, निःसङ्गा जैनसाधवः ॥

६

हस्ते पात्रं दधानाश्च, तुण्डे वस्त्रस्य धारकाः ।
मलिनान्येव वासांसि, धारयन्तोऽल्पभाषिणः ॥

### शिवपुराण।

७

भुंक्ते न केवली न स्त्रीमोक्षः प्राहुर्दिगम्बराः ।
एषामयं महान्भेदः, सदा श्वेताम्बरैः सह ॥

८

लुञ्चिताः पिच्छिकाहस्ताः, पाणिपात्रा दिगम्बराः ।
ऊर्ध्वाशना गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः ॥

९

धर्मिणोऽनन्तरूपत्वं, धर्माणां न कथंचन ।
अनेकान्तोऽप्यनेकान्त इति जैनमतं ततः ॥

### षट्-द्रव्य

१०

धर्माधर्मौ पुद्गलः खात्मकालाः ।
एतद्द्रव्याऽभिन्नरूपो हि लोकः ॥
तत्राकाशं सर्वतः स्थाप्यनन्त-
मेतन्मध्ये विद्यते लोक एषः ॥

११

शब्दान्धकारौ उद्योतः, प्रभा छायाऽऽतपस्तथा ।
वर्णगन्धरसस्पर्शा, पुद्गलानां तु लक्षणम् ॥

### २२ परिषह

१२

क्षुधा पिपासा शीतोष्णं, दंशाचेलारतिस्त्रियः ।
चर्या नैषेधिकी शय्या, आक्रोश-वध-याचनाः ॥

१३

अलाभरोगतृणस्पर्शाः, मलसत्कारपरीषहाः ।
प्रज्ञाऽज्ञानसम्यक्त्वमिति, द्वाविंशति परिषहाः ॥

### कर्मस्थिति

१४

ज्ञाने च दर्शनावरणे, वेदनीये चैव अन्तराये च
त्रिंशत् कोटाकोट्योऽतराणां स्थितिश्च उत्कृष्टा ॥

१५

सप्ततिः कोटाकोट्यो,
मोहनीये विंशतिर्नाम-गोत्रयोः ।
त्रयस्त्रिंशद् अतराणि,
आयुः स्थितिबन्ध उत्कर्षात् ॥

### ६ आगार

१६

आगाराः षड्विधाः प्रोक्ता, अपवादे जिनादिभिः ।
राज–गुरु–वृत्तिकान्तार–गण–देव–बलैर्युताः ॥

१७

द्रव्यक्षेत्रादिसंपन्नं, दोषजालविशोधनम् ।
निन्दा गर्हा क्रिया लीढं, प्रतिक्रमणमुच्यते ॥

---

## ( सप्तनयः )

१

नैगमः संग्रहश्चैव, व्यवहारर्जुसूत्रकौ ।
शब्दसमभिरूढैवंभूताश्चेति नयाः स्मृताः ॥१०॥

२

अन्यदेव हि सामान्यमभिन्नज्ञानकारणम् ।
विशेषोऽप्यन्य एवेति मन्यते नैगमो नयः ॥

३

सद्रूपताऽनतिक्रान्तं स्वस्वभावमिदं जगत् ।
सत्तारूपतया सर्वं संगृह्णन् संग्रहो मतः ॥

८३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यवहारस्तु तामेव प्रतिवस्तुव्यवस्थिताम् ।
तथैव दृश्यमानत्वाद् व्यापारयति देहिनः ॥४॥

तत्रर्जुसूत्रनीतिः स्याद् शुद्धपर्यायसंश्रिता ।
नश्वरस्यैव भावस्य भावात् स्थितिवियोगतः ॥५॥

विरोधिलिङ्गसंख्यादिभेदात् भिन्नस्वभावताम् ।
तस्यैव मन्यमानोऽयं शब्दः प्रत्यवतिष्ठते ॥६॥

तथाविधस्य तस्याऽपि वस्तुनः क्षणवर्तिनः ।
ब्रूते समभिरूढस्तु संज्ञाभेदेन भिन्नताम् ॥७॥

एकस्याऽपि ध्वनेर्वाच्यं सदा तन्नोपपद्यते ।
क्रियाभेदेन भिन्नत्वाद् एवंभूतोऽभिमन्यते ॥८॥

बौद्धानामृजुसूत्रतो मतमभूद्वेदान्तिनां संग्रहात् ।
साङ्ख्यानां तत एव नैगमनयाद्यौगश्च वैशेषिकः ॥

शब्दब्रह्मविदोऽपि शब्दनयतः सर्वैर्नयैर्गुम्फिता ।
जैनी दृष्टिरितीह सारतरता प्रत्यक्षमुद्वीक्ष्यते ॥९॥

एकवर्णं यथा दुग्धं बहुवर्णासु धेनुषु ।
तथा धर्मस्य वैचित्र्यं तत्त्वमेकं परं पुनः ॥१०॥



## संकीर्णप्रकरणम्

अर्थनाशं मनस्तापं, गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च, मतिमान्न प्रकाशयेत् ॥१॥
ब्राह्मे मुहूर्ते बुध्येत, धर्मार्थौ चानुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥२॥
शनैः पन्थाः शनैः कन्था, शनैः पर्वतमस्तके ।
शनैर्विद्या शनैर्वित्तं, पञ्चैतानि शनैः शनैः ॥३॥
सम्पत्सरस्वती सत्यं, सन्तानः सदनुग्रहः ।
सत्ता सुकृतसम्भारः, सकाराः सप्त दुर्लभाः ॥४॥
धनधान्यप्रयोगेषु, विद्यासंग्रहणेषु च ।
आहारे व्यवहारे च, त्यक्तलज्जः सुखी भवेत् ॥५॥
तिमिरारिस्तमो हन्ति, शंकातंकितमानसाः ।
वयं काका वयं काका इति जल्पन्ति वायसाः ॥६॥
इदमेव हि पाण्डित्यं, चातुर्यमिदमेव हि ।
इदमेव सुबुद्धित्वं, आयादल्पतरो व्ययः ॥७॥
क्वचिद्दन्तालको मूर्खः, क्वचिद्ज्ञानवती सती ।
क्वचित्काणो भवेत्साधुः, खल्वाटो निर्धनः क्वचित् ॥८॥
फलन्ति वेदाः कालेषु, पुराणं त्वेकमासके ।
मन्त्राः फलन्ति गान्धर्वी, ज्योतिर्वैद्यं निरन्तरम् ॥९॥
पुस्तकं वनिता वित्तं, परहस्तगतं गतम् ।
यदि चेत्पुनरायातं, नष्टं भ्रष्टं च खण्डितम् ॥१०॥
श्वशुरगृहनिवासः स्वर्गतुल्यो नराणां,
यदि भवति विवेकी पञ्च वा षड् दिनानि ।
दधिमधुघृतलोभान्मासमेकं,
वसेच्चेद्भवति विगतलज्जो मानवो मानहीनः ॥११॥
असारे खलु संसारे, सारं श्वशुरमंदिरम् ।
क्षीराब्धौ च हरिः शेते, शिवः शेते हिमालये ॥१२॥
संमुखो ह्यर्थलाभाय, दक्षिणे सुखसंपदा ।
पृष्ठे तु मरणं चैव, वामे चन्द्रे धनक्षयः ॥१३॥

## आशीर्वाद

दीर्घायुर्भव भण्यते यदि तदा तन्नारकाणामपि ।
चेत् प्रोच्येत धनाधिको भव तदा तन्म्लेच्छकानामपि ॥
यद्युच्येत च पुत्रवान् भव तद तत् कुक्कुटानामपि ।
तस्मात् सर्वसुखप्रदोऽस्तु भवतां श्रीधर्मलाभः श्रिये ॥१॥
मङ्गलं भगवान् वीरो, मङ्गलं गौतमः प्रभुः ।
मङ्गलं स्थूलभद्राद्याः, जैनधर्मोस्तु मङ्गलम् ॥२॥

संस्कृत श्लोक संग्रह द्वितीय भाग समाप्तम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# विषय सूची


| नं० | विषय | पृष्ठ | श्लोक सं. |
|---|---|---|---|
| १ | वैराग्य | २ | ४३ |
| २ | मोह | ५ | २० |
| ३ | गति वर्णन | ६ | ४२ |
| ४ | ध्यान | ८ | २१ |
| ५ | चार ध्यान वर्णन | १० | १७ |
| ६ | कर्म | ११ | ७७ |
| ७ | संसार स्वरूप | १५ | ३८ |
| ८ | द्यूत | १८ | १० |
| ९ | मांस | १८ | ३३ |
| १० | मदिरा | २० | २८ |
| ११ | वेश्या | २२ | १४ |
| १२ | पारधी | २२ | ६ |
| १३ | पर स्त्री लम्पटी | २३ | २४ |
| १४ | कामदेव | २५ | ४५ |
| १५ | स्त्रीगुण | २७ | ३५ |
| १६ | स्त्री स्वभाव निंदा | २९ | ४२ |
| १७ | स्वभाव वर्णन | ३१ | १७ |
| १८ | वीर स्वभाव | ३२ | १० |
| १९ | गुण | ३३ | १७ |
| २० | सत्संग | ३४ | ३२ |
| २१ | असत् संगति | ३६ | ८ |
| २२ | सज्जन स्वभाव | ३६ | ४६ |
| २३ | दुर्जन | ३९ | ३७ |
| २४ | मूर्ख | ४१ | २४ |
| २५ | पण्डित | ४३ | १६ |
| २६ | विद्या | ४४ | ४३ |
| २७ | काल चरितम् | ४६ | ३७ |
| २८ | परोपकार | ४८ | १८ |
| २९ | जीवित साफल्यं | ४९ | ९ |
| ३० | वृथा जन्म | ५० | ३ |
| ३१ | मनुष्य भव के १० दृष्टांत | ५० | १० |
| ३२ | उपदेश | ५१ | १५ |
| ३३ | स्वार्थ | ५२ | ७ |
| ३४ | शौचम् | ५२ | ३२ |
| ३५ | धन प्रशंसा | ५४ | ३२ |
| ३६ | धन दोषाः | ५६ | १९ |
| ३७ | दरिद्र | ५७ | १२ |
| ३८ | कृपण | ५८ | १२ |
| ३९ | याचक | ५९ | ११ |
| ४० | नौकर | ५९ | १४ |
| ४१ | मित्र लक्षणम् | ६० | ३३ |
| ४२ | पुत्र वर्णन | ६२ | ३१ |
| ४३ | विनय | ६३ | २३ |
| ४४ | ऐक्यम् | ६५ | १६ |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir


| नं० | विषय | पृष्ठ | श्लोक सं. | नं० | विषय | पृष्ठ | श्लोक सं. | नं० | विषय | पृष्ठ | श्लोक सं. |
|---|---|---|---|---|---|---|---|---|---|---|---|
| ४५ | कलियुग | ६६ | ११ | ५४ | श्रोता | ७६ | ८ | ६३ | मौन | ८० | ७ |
| ४६ | उद्यम | ६६ | ३२ | ५५ | कृतघ्न निन्दा | ७७ | ५ | ६४ | पश्चात्प्रशंसा | ८० | ३ |
| ४७ | चिन्ता | ६८ | २४ | ५६ | पर द्रोह | ७७ | ३ | ६५ | विचार पूर्वक कार्य | ८० | १० |
| ४८ | राजधर्म | ६९ | ४१ | ५७ | प्रवास | ७७ | ५ | ६६ | षट्लेश्या स्वरूप | ८१ | ८ |
| ४९ | वर्ण-धर्म | ७२ | २१ | ५८ | स्थान महात्म्य | ७८ | ७ | ६७ | नास्तिक स्वरूप | ८१ | १६ |
| ५० | जातिर्नकारणं | ७३ | १३ | ५९ | स्वच्छन्दी | ७८ | २ | ६८ | जैन धर्म | ८२ | १७ |
| ५१ | गृहस्थ स्वरूप | ७४ | १५ | ६० | जरा | ७८ | ७ | ६९ | सप्तनय | ८३ | १० |
| ५२ | श्रावक | ७५ | १० | ६१ | क्षुधा | ७९ | १० | ७० | संकीर्ण प्रकरण | ८४ | १३ |
| ५३ | निन्दक | ७६ | १० | ६२ | अवसर | ७९ | ७ | ७१ | आशीर्वाद | ८४ | २ |


For Private And Personal Use Only